MSS No. 148 Subject Philosophy

Name of MSS Siddhantacandrikatikā
५६२४५

Author — —

Period n. d. Folios 113 + (i) to (ix a) Irregular Folios

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 045a to 048

चन्द्रोदय
भिन्न पत्रक ॥ ला० गं० १४ पं० ग० पृ०

ह० लं०

शास्त्रात:

ॐ श्रीगणेशाय नमः यद्वेदाः सततं स्तुवन्ति नितरां ध्या-
यन्ति यं योगिनो यः सृष्ट्यादिनिदानमुख्यकरणं ज्ञानी २२
न्द्रोपि यः पुमान् तस्मिन् प्रोल्लसत्ताकृताद्वैवपुषि श-
ब्दात्मके प्रांकरे सच्चित्तं रमतां सदा मम यह रे श्रीमत्प-
र ब्रह्मणि ॥१॥ चित्रामान्बुसागरे हिमरुचे विम्बा- ३५
तोः श्रीगुरोः कण्ठीनाथ प्रभुमाभिधानललितैः
कारुण्य वैधोंबुः स्वांतः प्रांत गतो घका
तं श्रीपादपंकेरुहं हंसं कलयामि हृद्यं मम

२ लं प्रत्यक्षदैवं पित्र्यं वा ज्ञात्वा तत्र अनेकं श्रीकमलधूर्जटि
दीक्षितः तर्कसंग्रहगूढार्थान्विवृणोमि यथामतिः
श्रीमद्विक्रमपट्टनाधिपमहाराजाधिराजामित्र
घ्न श्रीगजसिंहभूपतनय श्रीराजसिंहप्रभोः सु
ज्ञानाय विनिर्मितोऽतिसुगमः सिद्धांतचंद्रोदयो
ऽस्यः साधु तनोतु पंडितमनोहर्षं ततं गापितं ४
ग्रंथादौ निर्विघ्नपरिसमाप्त्यर्थमनं महोपाध्यायः
शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं नमस्कारं

V निर्विघ्नसमाप्तिकामो मंगलमाचरेदिति श्रुतिः २

॥उत्तरकालकर्तव्यत्वेन ज्ञापनं॥
॥ प्रतिज्ञा ३॥

विषयांतरस्पृहाराहित्यपूर्वक प्रकृतग्रंथशुश्रूषासंपादनमवधानम् २॥ ॥विषयप्रयोजनम

त्मकं मंगलमाचरन् श्रोतॄन् प्रवृत्तयेऽनुबंधं चतुष्टयं प्र-
दर्शयन् शिष्याणामवधानाय चिकीर्षितं ग्रंथ
प्रतिज्ञां च कुर्वन् शिष्याणां मंगल प्रवृत्तये आस्ति-
क मार्ग प्रवृत्तये च तन्निबध्नाति निधाय इत्यादिना।
तर्क्यंते प्रमितिविषयीक्रियंते इति तर्काः द्रव्यादिप-
दार्थास्तेषां संग्रहः संक्षेपेणोद्देशो लक्षणपरीक्षा-
यस्मिन् सः ग्रंथः नाममात्रेण वस्तुसंकीर्तनमुद्देशः
यथा द्रव्यं गुणः इति असाधारणधर्मो लक्षणं यथा
गंधवत्त्वं पृथिव्याः लक्षितस्य लक्षणं संभवति न वेति

॥हेतिसाध्यत्वप्रकारकेच्छाविषयत्वं चिकीर्षितं २

॥प्रकृतग्रंथप्रतिपा-
द्यतावच्छेदककोटि-
प्रवेशो निबंधः ४

विचारः परीक्षा यत्तु संग्रहकृत्यस्य संक्षेपेण स्वरूपकथनं।
अन्नंभट्टेन २ मिति व्याख्यानं तन्न स्वरूपकथनमात्रेण पदार्थतत्व
ज्ञानासंभवात् ननु एवं ग्रंथरचना विलंबनं कीदृश
सुखबोधायेति ४१ प्रयोजनायेत्यत आह सुखबोधायेति पदार्थतत्वज्ञाना नानायासेन ४१
येत्यर्थः तथा च त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो
लक्षणं परीक्षा चेति भावः समस्यात्रोद्देशादेः कृतत्वात्त्व
दार्थतत्वज्ञानं संभवत्येवेति भावः अत्रोद्देशस्य पदज्ञा
नं प्रयोजनं लक्षणस्येतरभेदरूपं यत्साध्यं तद्ज्ञाना।
नमिति वस्तुते परीक्षायाः लक्षणदोषपरिहारः सा।

सि० चं०
३

3

वं ननु कुसमांजलीलीलावत्यादिग्रंथाध्यैतेनापि पा
वदार्थतत्वज्ञानसंभवे किमभिनवग्रंथरचनेनावलेवा
ने २ नेत्यतश्चाह बालानामिति तथा च तेषामतिदुर्बोध
त्वे तत्र बालानां सुखेन बोधो न भवतीति भावः स्त्र
त्राधीतव्याकरणकाव्यकोषालंकारोऽनधीततत्वा
यप्राप्तो बालः नन्वाशीर्वादनमस्कारवस्तुनिर्देशा
मेदतः मंगलं त्रिविधं प्रोक्तं शास्त्रादीनां मुखादि
ह २ ष्ठि ष्विं मंडतैर्मंगलस्य ग्रंथादावश्यकर्त्तयातदत्रा
ह्मचाकथं ग्रंथः क्रियत इत्यतश्चाह निघायेतिवि

3

श्वपूं जगत्कर्त्तारं श्रीसांबमूर्त्तिं हृदि मनसि निधाय नितरां
ध्यात्वा गुरुवंदनं विधायेत्यर्थः तथा चात्र नमस्कारात्म
कं मंगलं कृतमेवेत्याशयः नन्वीश्वरमंगलेनैव समाप्तजा।
स्य गुरुवंदनमयुक्तमिति वाच्यं ईश्वरूपे गुरुत्वात्। पि ५
गुरौ रूपेन कथ्यतु गुरुरेव परं ब्रह्मेत्यादिवचनैर्गुरो।
२ वोत्कृष्टप्रतिपादनेन तस्यैवावश्यकत्वादीश्वरमंगले
तु समाप्तौ हेतूत्तरसामग्रीसंपादनाय तेनेश्वरस्ववा।
ति २ दिमतनिराकरणाय ग्रंथबाहुल्येन यत्रेश्वरमंगलमेवास्तिता।
त्रतस्यैव ग्रंथान्ते दिवाकरदीक्षितेदमावेदीयदीक्षिते

श्वानुषोत्पादकत्वं वदंतीति विवेकः इति श्लोकार्थः अथ मंग
लेन समाप्तिं प्रति कारणं कादंबर्यादौ मंगलसत्वेपि स
मान्त्यनुदयात् नास्तिकग्रंथे मंगलाभावेपि समाप्त्यु
दयात् अन्वयव्यतिरेकव्यभिचारादिति चेन्न यतस्ते
स्वितरयावत्कारणसत्वे यत्सत्वमित्यस्यैवान्वयपदे ।
न कादंबर्यादौ मंगलसत्वेपि कारणांतरस्यासत्वक
ल्पनेनान्वयव्यभिचाराभावात् नास्तिकग्रंथे च का
र्यात्कारणमनुमेयमिति न्यायेनायं नास्तिकः कृत
मंगलकः विघ्नध्वंसपूर्वकग्रंथपरिसमाप्तिमत्वा
त् चैत्रवदित्यनुमानाज्जन्मांतरीयमंगलसिद्धेर्व्या ।

न्यमित्यर्थः परत्वं चाऽधिकदेशवृत्तित्वं तथाहि द्रव्यादित्रिकं सदि-
नि २ ति गृह्यते सत्ताभावः सत्तेति प्रत्यतेस्तत्र सत्तानामका च न जा-
तिरिति सा च द्रव्यत्वाधिकरणद्रव्ये वर्तमाने सत्यधिकदेशे
गुणादावपि वर्तते अतः परं सामान्यमित्युच्यते अपरत्वं च
न्यूनदेशवृत्तित्वं वर्तते च द्रव्यत्वे गुणादिसाधारणसत्ताऽ-
धिकरणगुणादेर्न्यूनदेशे द्रव्ये तद्वृत्तित्वं अथैवं सति
द्रव्यत्वस्य पृथिवीत्वापेक्षया परत्वात्परं सत्तेति वक्ष्यमा-
णग्रन्थासंगतिरिति चेन्न वक्ष्यमाणग्रन्थस्य सकलजात्य-
पेक्षयापरत्वाभिप्रायकत्वात्तेन सामान्यत्वादिकं न जा-
तिः किं तूपाधिः यद्यपि धर्ममात्रमुपाधिरित्युच्यते त-

याश्चजातिभिन्नोधर्मएवात्रविवक्षितः सद्विधासखंडोपाधि
रखंडोपाधिश्चतत्राद्योबहुपदार्थघटितोधर्मः यथाउक्त
प्रिष्टत्वादिवक्ष्यमाणाभावत्वाभावत्व शरीरत्वेंद्रियत्ववि
षयत्वकारणत्वकार्यत्वाकाशत्वकालत्वदिक्त्वादयश्च
निर्वचनीयो द्वितीयोऽधर्मः मूलकारोक्तसामान्यलक्षणप्रसंगादे ।
५ वप्रकाश्यते नित्यमेकमनेकानुगतंसामान्यमितिअत्रै अनेकसमवेतं ६
अमादितः ८ कत्वमायाततः न च तल्लक्षणासंभवति घटत्वपटत्वादेरने
केषुएकत्वाभावात् अनेकत्वस्यैकभिन्नात्मकत्वे नेकत्वा । एकत्वंच २
नेकत्वयोर्विरोधात् यद्वातत्वसजातीयधर्मांतरराहि ।
त्यरूपंस्वरूपं अथवाएकमिति स्वरूपकथनं अनेका ।

त्रि०चं०
त०दी०
॥ द्वै ॥
४

पत्वादालस्यस्य कृत्यभावरूपत्वान्न चतुर्विंशतित्वव्याघातः
इति गुणसामान्यनिरूपणं कर्म विभजते उत्क्षेपणेति क
र्मत्वजातिः प्रत्यक्षसिद्धा संयोगभिन्नत्वे सति संयोगा
समवायिकारणं कर्म संयोगभिन्नत्वं घटपटादावव्या
प्त्यर्थं तदुक्तं संयोगेत्यादिकायपुस्तकसंयोगस्यासम
वायिकारणं हस्तपुस्तकसंयोगस्तत्रातिव्याप्तिवार
णाय सत्यन्तं भ्रमणादीनां गमनेन्तर्भावं वक्ष्यतीति
न पंचत्वविरोधः इति कर्मसामान्यनिरूपणम्
सामान्यं विभजते परमिति परं सामान्यमपरसामा

॥ द्वै ॥

॥ गुणपदार्थनिरूपणकाले किंचिद्दर्शीवच्छिन्नाशक्यतानलाल घटनिरूपणकालावच्छिन्नगुणसामान्य ॥

मान्यनिरूपणो गुणो विभजते रूपेति तत्रैत्यनुवर्त्तते गुणत्वं जा
तिरेव मानं पूर्ववत् शब्दादौ गुणग्रहणं करणोऽच्छेवनिया
मिका इति ज्ञेयं द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः
द्रव्यकर्मणोरतिव्याप्तिवारणाय विशेषणद्वयं सामान्या
दावतिव्याप्तिवारणाय विशेष्यदलं चतुर्विंशति गुणा
इति ज्ञेयं रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वं
संयोगविभागौ परत्वापरत्व बुद्धयः सुखदुःखेच्छाद्वेषप्र
यत्नाश्चेति वैशेषिकसूत्रस्य चकारस्यानुक्तसमुच्चा
उग। यकत्वान्नतद्विरोध इति बोध्यं लघुत्वस्य गुरुत्वाभावरू

सि०चं०
त०स०
८

गौरवात् ४

वच्छेदेनकुतोनघटादिचाक्षुषमितिवाच्यंश्चालोकसंयो॥
गावच्छिन्नचक्षुःसंयोगएवचाक्षुषनिदानमित्यस्मदभि॥
प्रायात्किंचातिरिक्ततमःकल्पनेतत्प्रागभावादिकल्प॥
नेचगौरवमेवावशिष्यतेतस्मात्प्रौढप्रकाशकतेजः॥
सामान्याभावएवतमःयत्किंचित्तेजोऽभाववत्तितमस्त्वाप
त्त्यासामान्यपदेस्ववर्णेऽपिवर्ततिदेशेंऽधकारापत्त्याप्रकाशक भावा ६
पदेत्र्यणुकादिम त्त्वंधकाराभावापत्त्याप्रौढपदेनी॥
लेतमश्चलतीतिप्रतीतिर्भ्रमःउष्णस्पर्शस्यापलायि॥
त्वमप्राकट्यत्वात्तमोभावोनतेजइतिबोध्यंइतिद्रव्यसा॥ ८

ननुतमोऽभावश्चेत्तेजःकिंनस्यादितिचेन्न भासमानलोकाश्रयत्वे तेजस्त्वआपत्तेः कोऽपि तमोऽभावरूपतातेजसः इतीकतेन्नप्राकरते २

सप्रतिभावविशिष्टरूपवत्त्वात्।

वैधर्म्यान्नवम्योमितुमर्हतीति कथं नैवेति चेन्न तस्य द्रव्य तमसः १

चक्षुर्जन्यज्ञानविषयीत्वेन ३॥ त्वेश्चालोकसहकृतेनैव चक्षुरिन्द्रियेण ग्रहणं स्यात् द्रव्य

चाक्षुषप्रत्यक्षे इन्द्रियकालोकसहकृत्वेनैव चक्षुरिन्द्रिया

णां कारणत्वात् अथ केषुचिद्घूकादीनामालोकमन्तरेण कथं

चाक्षुषमिति चेन्न अदृष्टविशेषोपगृहीतघूकादीन्द्रि सहगृहीत ५

॥न्तूनालोक एव ४ यस्यानुत्कृष्टालोक एव सहकारीति कल्पनात् वि

लक्षणादृष्टवशात्केचिदनुत्कृष्टालोकस्यापि सह

कारित्वकल्पनात् यद्वास्मदीयत्वेन द्रव्यचाक्षुषं वि

त्वा १ शेषणात् न च एवं तद्वत्केदेनालोकसंयोगाभावत्वेन ना

तद्धि घूकादीनामन्धतमसि चाक्षुषं न स्यात् अतः यद्वेति २

क्रि० चं०
त० कौ०
६

इच्छागुणान्यतरत्वमादायातिव्याप्तेर्वारणाय जातीतिपदम् २

।। गुणसमवायिसमवेतसत्ताभिन्नजातिसमवायित्वं द्रव्यलक्षणम् २ ।। १ ।।

।। एतच्च विशिष्टं रूपं रसावधिकपृथक्त्वैकत्वविशिष्टम् ।। २ ।।

नियामिकत्वादिति चेन्नैवं गुणसमानाधिकरणसत्ताभिन्न
जातिमत्वस्याविवक्षितत्वात् एकरूपं रसात्पृथगिति प्रतीति
स्तु न समवायेन रूपे पृथक्त्वैकत्वे चावगाहते गुणे गुणान
ङ्गीकारात् किंतु पटनिष्ठे एव ते सामानाधिकरण्यसंबंधे
न प्रतीयेते अतस्तत्र नातिव्याप्तिरिति मंतव्यं नुवत्वमेव
व्युत्पादयति पृथिवीति अथ तमोवादः ननु इहांधकार इति
प्रतीतिस्तमसः प्रसिद्धत्वेन नीलं तमश्चलतीति प्रतीते
स्तमसो गुणक्रियावत्वेन द्रव्यत्वं सिध्यति स्पर्शरहित
त्वे सति रूपवत्वेन न पृथिव्यादावंतर्भावोपि न तस्य तदु
क्तं तमः खलु चलं नीलं परापरविभागवत् प्रसिद्धद्रव्य

।। अनुवृत्तौ ८ ।।

मीमांसकाः प्रोक्तमेतन्नि त्यादिना ६ ।।

तमोद्रव्यं नीलरूपाधारत्वात् क्रियाधारत्वाद्घटवत् तमसः २

द्विवदि ।। ३ ।।

वे
द्विनाप्यन्नैतिद्रव्यत्वजातिमत्त्वंगुणवत्त्वंसमवायिकारण-
त्वंवाद्रव्यसामान्यलक्षणंद्रव्यत्वजातौविदंद्रव्यमिति-
प्रत्यक्षंद्रव्यवृत्तिर्यासमवायिकारणतासाकिंचिद्ध-
र्मावच्छिन्नाकारणतात्वात्दंडवृत्तिकारणतावदित्यनु-
मानेवामानंतत्राहश्राधर्मविधयाद्रव्यत्वजातिसिद्धिः
नन्वाद्यक्षणेद्रव्यस्यनिर्गुणत्वेनकथंगुणवत्त्वंतल्ल-
क्षणंनचतदानींगुणास्तत्रसंभवतिपूर्वघटरूपसम-
वायिकारणाभावात्समानसामग्रीकत्वेनतुघट-
गुणयोर्भेदोनस्यात्कारणभेदस्यैवकार्यभेद-

सि० चं०
न० टी०
५

चारवारणायभक्तीत्यादिचैत्यवंदनप्रकृतवौद्धेतद्वारणा
यवेदानुमतेतिभक्तिश्रद्धाराध्यत्वेनज्ञानंश्रद्धाचफलाव
रूपंभावनिश्चयइतिमतेप्यः नव्यास्तुमंगलस्यविघ्न।
ध्वंसएवफलंसमाप्तिस्तुप्रतिबंधकाभावघटितका। सप्तपदार्थेषुमध्ये।
रणासमुदायादेवेत्याहुः इतिमंगलवादः तेषोहेशास्त्रेवा
दौकर्तव्यतयातत्पुरस्कारेणपदार्थान्विभजतेद्रव्येति।
तद्वारेणैव ६ ज्ञेयत्वादिकंपदार्थसामान्यलक्षणंसप्तग्रहणस्या।
ह्यार्थमेवसप्तग्रोपिइतिपदार्थसामान्यलक्षणंद्रव्यवि
भजतेतत्रेतितत्रसप्तपदार्थमध्यइत्यर्थः नवैवेतिद्र।
व्याणिनवैवेत्यन्वयः एवंतत्रेतिपदंचतुर्विंशतिर्गुणाइत्या

॥ईश्वरज्ञानविषयत्वं

त्तिरेकव्यभिचाराभावाच्च ननु मंगलस्य श्रुतिबो
धितकर्त्तव्यताकत्वे किं प्रमाणमिति चेन्मंगलं श्रु
तिबोधितकर्त्तव्यताकं अलौकिकशिष्टाचारविष
यत्वात् दर्शादिवदित्यनुमानमेव लौकिके व्यभि
चारवारणायालौकिकेत्याचारविशेषणं
आचारश्च क्रियाविषयत्वसामान्यात्कृतिरेव
विवक्षितः उन्मत्तकृतरात्रीश्राद्धादौ हेतौ सत्वव्य
भिचारः अतः शिष्टेति शिष्टत्वं च भ्रान्तिश्राद्धादि
भिर्वेदानुमतकर्मकर्त्तृत्वे आस्तिकाभासे व्यभि

अनेकानुगतत्व२

नुगतत्वं चानेकवृत्तित्वं तच्च समवायेन बोध्यं तेनाऽत्यंताभावे
नातिव्याप्तिः तस्याभावीयवैशिष्ट्यविशेषणतासंबंधेन
अनेकानुगतत्व २ वृत्तेः इदं च संयोगादावव्याप्तमत उक्तं नित्यमिति गगनपरिमा
णादिवारणायानेकेति इति सामान्यनिरूपणं ॥१॥
विशेषं विभजते नित्येति स्वतोव्यावर्त्तकत्वं विशेषत्वं स्वयं वि
शेषो द्रव्यादिभिन्नो विशेषादित्यत्र स्वयमेव व्यावर्त्तको भवती
ति लक्षणसमन्वयः व्यावर्त्तकत्वं नाम व्यावृत्तिजनकत्वं व्या
वृत्तिश्चेतरभेदस्तज्ज्ञाने चेदमत्रैवेति स्फुटतरं ननु विशेषाण
वकिमर्थमाश्रयितव्य इति चेत् द्व्यणुघटादीनां कपालसम
वेतत्वादिकं पटादितो भेदकमस्ति परमाणूनां तु विशेषं वि

गत्पत्तगमावेन२

समवायसंबंधावच्छिन्नशब्दत्वावच्छिन्नशब्दनिष्ठकार्यतानिरूपिता तादात्म्यसंबंधावच्छिन्ना आ
किंचिद्धर्मावच्छिन्ना कारणता न्यायाः कपालनिष्ठकारणतावदित्यनुमानेन विशेषसिद्धिर्वे

सि०चं०
त०टी०
॥२०॥

नापरस्य रमेदकेन किंचिदमस्यंतो नानायत्या विशेषमशा श्रयित ।
व्यः एव शब्दसमवायिकारणतावच्छेदकतया चिविशेषः सिद्ध्य ।
ति अत्रानुमाने पूर्ववत्कारणतात्वलिंगकं आकाशत्व शब्द ।
समवायिकारणत्व यद्वाकत्वादिकमवच्छेदकमिति स्वतो ।
व्यावृत्यर्थमेव वा सौगौका ख्यः नित्यद्रव्यवृत्तयइत्या श्रयकथने
इति विशेषनिरूपणं समवायस्यैकविधत्वादाह समवायस्त्वि
ति नित्यः संबंधः समवायः संयोगाभावारणाय नित्य इति गगना
दिवारणाय संबंध इति संबंधश्च संबंधिभिन्नत्वे सति संबंधा
श्रितः स्वभिन्नसंबंध्याश्रितः स्वभिन्न प्रतियोगिकः संबंध ।
व्यवहारहेतुर्भवति च घटघटत्वयोः समवायः स्वभिन्न यत्संबंधि
घटो घटत्वं च तदाश्रितः अभावाद्यात्मकस्वरूपसंबंधादिवारणा

सर्वलक्षणेगो
स्वाद्याह द्वितीयं ३
वा २

संबंधत्वलक्षणं किंपुनः स्वभिन्नसंबं
स्वभिन्नसंबंध्याश्रितस्तत्र संबंधीकः संबंधवत्त

सू२

यभिन्नत्वं निविष्टं स्वरूपसंबंध एवं परासंबंधव्यवहारस्य गौण
त्वेन तत्र संबंधलक्षणस्यानपेक्षितत्वात् संयोगसमवाययोरेव
मुख्यसंबंधो ननु समवायस्य सद्भावे किं मानमिति चेदत्र प्रा
चः इह कपाले घटसमवाय इति प्रत्यक्षमिति जगादिरे नव्यास्तु
भूतले घटसंयुक्तमिति वद्गगने घटसंयुक्तमिति प्रत्यक्षात्तथा
त्संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वेन समवायेन प्रत्य
क्षः तस्यातीन्द्रियसाधारणत्वात् किंत्वनुमेयः तथाहि यघ
द्विशिष्टज्ञानं तत् किंचित्प्रकारकं किंचिद्विशेष्यकं किंचि
त्संसर्गकं चेति सर्वजनसिद्धं एवं सति रूपवान् घट इति विशिष्ट
ज्ञाने विशेषणविशेष्योभयसंबंधविषयके विशिष्टज्ञाने ।

केचिदित्यनेनैतदस्वरसः घटम् जलसंयोगादुत्पन्नमात्रसमानवैशिष्ट्यप्रतियोगानुयोगिताभेदात्त्वे विषयघटम् जलयो विशेष

सि० चं०
त० टी०
॥ १९ ॥
विशेष्य

त्वाद्दंडीति विशिष्टज्ञानवदित्यनुमानात् द्रव्ययोरेव संयोग इति निय
मेन संयोगस्य बाधात् समवायसिद्धिरित्याहुः प्रकारताकत्वेनापि विष
यताविशेषः एवं विशेष्यत्वमपि प्रकारत्वेनाभासमानवैशिष्ट्य
त्वेनाम तदनुयोगित्वं वैशिष्ट्यं नाम संबंधः दंडीति ज्ञाने भास
मानवैशिष्ट्यं संयोगस्तत्प्रतियोगित्वं दंडे तदनुयोगित्वं पुरुष
इति केचित् प्राभाकरमीमांसकाः समवायस्यापि स्वरूपसंबंधः
एव निवेश्यत इत्याहुस्तदसत् रूपाद्यात्मकानंतस्वरूपाणां सं
बंधत्वे गौरवात् न च समवायस्यैकत्वे रूपवान्वायुरिति प्र
तीत्यापत्तिः स्पर्शसमवायस्य रूपसमवायस्य चैक्यादिति
वाच्यं रूपविशिष्टसमवायाधिकरणतायास्तादृशप्रतीती
ति नियामिकाया वायावसत्त्वात् इति समवायनिरूपणं ॥ अभाव

३॥:१९५२॥५१९॥
प्रतियोगित्वं २
रूपवत्त्वा २

यत्किंचिदुक्तुं न शक्यते तत्राखण्डोपाधिः केवलनानुचित्यात् ।।२।।

उद्देश्यतावच्छेदकविधेययोरैक्यादितीयं लक्षणमाह ।। परस्परकोटिमाभावात् इत्यादिना प्रागुक्तदोषोपगतं अतः शुद्धा ।।१

अभावत्वज्ञानेऽभावत्वस्य ज्ञानस्य कारणत्वात् आत्माश्रयोऽतः स्वकीयं लक्षणमाह १

यत्त्वभावत्वप्रतियोगित्वं १

विभजते अभाव इति भावभिन्नत्वं भावत्वाभावः प्रतियोगिज्ञाना।

केचित् मते अखण्डोपाधिः ३ धीनज्ञानविषयत्वं वाऽभावत्वमखण्डोपाधिरित्यपि केचित् भाव।

त्वं च समवायैकार्थसमवायान्यतरसंबंधेन सत्तावत्त्वमखण्डोपा।

प्राभाकराः ४ धिरित्यपि केचित् अत्र गुरवः अभावोधिकरणात्मक इत्याहु।

स्तन्न जलगतगन्धाभावस्य जलस्वरूपतया घ्राणजानुपप।

तेः जलस्य घ्राणजायोग्यत्वादिति दिक् इत्यभावसामान्यनिरूप।

णं अथ पदार्थानां साधर्म्यवैधर्म्ये निरूपयिते सप्तानां ज्ञेयत्वा

दिकं साधर्म्यमित्युक्तं तच्च प्रागुक्तमेव द्रव्यादीनां भावत्वं द्रव्यादिपंचादिष

नां भावत्वे सत्यनेकत्वं समवायेन संबंधित्वं च द्रव्यादिचतु।

र्णां समवेतसमवेतत्वं द्रव्यादित्रयाणां सत्तावत्त्वं द्रव्याद्यु।

इति पदार्थविभाजकोपाधिमत्त्वम् १।।

नादृश्यजातिमत्त्वं द्रव्यत्वगुणत्वे १॥

णयोर्नित्यानित्योभयवृत्तिसत्ताभिन्नजातिमत्त्वं कर्मणो ।
वृत्तिजातिमत्त्वं वा गुणकर्मान्यत्वे समवायिकारणत्वं गुणा
दिध्वंसो गुणकर्मशून्यत्वं सामान्यादिचतुष्टयस्य सामा
न्यशून्यत्वं येषां यत्साधर्म्यं तदितरेषां वैधर्म्यमिति ध्येयं ।
इति श्रीसिद्धान्तचन्द्रोदये तर्कसंग्रहव्याख्याने पदार्थो ।
द्देशविभागनिरूपणं नाम प्रथमः परिच्छेदः ॥ [illegible]
पदार्थानभिज्ञस्य शृतितेषामुद्देशक्रमानुसारेण लक्षद
णं वक्तुमुपक्रमते गंधवतीति गंधवत्त्वं च समवायेन ।
बोध्यं तेन कालिकसंबंधेन काले दैशिकसंबंधेन ।

३ सामान्यसमवायवत्त्वं जातिसमवायः- ३

दिक्षिणगंधवत्तस्यसत्वेपिनतत्तिः तयोरैक्येननतेनसंबंधे
नैवैस्वर्त्तधारत्वात् प्रथनदेवह्लिलत्ततं पदव्यास्या ।
व्यत्नेनमेदद्रवृत्तिकयत्नि कालमाकाश्रयत्वादेजो
त्तित्ववाधकम तुल्यत्वेन तुल्यव्याप्ति हूतित्वघटत्वा ।
कलाश्रुतत्वादीनोजातीनोमेदे संकरस्त्वपरस्परा ।
त्वेतामदस्यमानाधिकरण्यं धर्मयोरेकत्र समावेश्यो
मूर्त्तत्वादेजोतित्वे भूतत्वावितदायमनतिवर्त्तमानस्यमूर्त्तत्वे
विहायपरमानेवर्त्तमानस्य भूतत्वस्य च पृथिव्यादिवृत्त
येनत्वात् भूतत्वस्यानुजातेजातिमतेहपदार्थानिः ति ।
श्रुतत्वस्यजातिमतेहपदार्थत्वाभावेनेकानस्यसाति ।

सि० चं०
त० टी०
१३

अतिव्याप्तिः अलक्ष्यवृत्तित्वे सत्य लक्ष्यवृत्तित्वं तत्रैव गोः शृंगित्वं लक्षणं ॥
तस्यातिव्याप्तिग्रस्तत्वात् ॥४॥ सूप १

तत्र जातिनीको [illegible]
[illegible] असंभवदोषत्रयशून्यं । तिव्याप्य २
यथा गोः सास्नादिमत्त्वं अव्याप्तिः लक्ष्यैकदेशावृ
त्तित्वं अत्र एव गोः नैकपिलत्वं लक्षणं तस्या[illegible]व्या ।
प्तिग्रस्तत्वात् असंभवः लक्ष्यमात्रावृत्तित्वं यथा । अत्र मानस्यदं हान्ता
गोः एकशफत्वं न लक्षणं असंभवग्रस्तत्वात् शीकम ५॥
एवं गंधवत्त्वस्य लक्ष्यैकदेशपाषाणाणामवृत्ताहीरका
त्व २ द्यावृत्तिस्वरूपाव्याप्तिग्रस्तत्वात्कथं पृथिवीलक्ष
णत्वमितिचेन्न तत्र अ[illegible]सानिगंधोपलंभेन तत्रापि ।

गंधकल्पनात् तस्यानुद्भूतत्वादनुपलब्धिरित्यनुद्भू
तत्वं जातिस्तद्व्याप्यउद्भूतत्वमिति गंगेशोपाध्या॰
यः उद्भूतत्वं जातिस्तद्व्याप्योऽनुद्भूतत्वमिति जरन्नै॰
यायिकाः तदुभयमपि संकरस्य जातिबाधक॰
त्वेन साधीयः शुक्लत्वादिना संकरात् तथाहि संक॰
रो नाम परस्परात्यन्ताभावसमानाधिकरणयोर्धर्म॰
योरेकत्र समावेशः अनुद्भूतत्वमपहाय शुक्लत्वमनु॰
द्भूतशुक्लेऽस्ति शुक्लत्वमपहायानुद्भूतत्वमनुद्भू
ते गंधेऽस्ति तदुभयमप्यनुद्भूतशुक्लेऽस्ति एवमुद्भू

व्यक्तेरभेदस्तुल्यत्वं इति एकव्यक्तिकत्वमाकाशत्वादेर्जातित्वे बाधकम् तुल्यत्वं तुल्यव्यक्तिकत्वं घटत्वकलशत्वादीनां जातीनां
भूतत्वं विहाय मनसि वर्त्तमानस्य मूर्त्तत्वस्य मूर्त्तत्वं विहाय गगने वर्त्तमानस्य भूतत्वस्य च पृथि-
व्यादावेकत्र समावेशो भूतत्वादेर्जातित्वे ... तत्र जातिस्वीकारे तयैव व्यावर्त्तकत्वाच्च समवायस्य
विशेषस्य जातिमत्वे स्वतो व्यावर्त्तकत्वस्य हानिः

भेदे संकरश्च परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयो॥ [illegible]व्याप्तिरूपत्वात् अनवस्थात्त जातेर्जातिमत्वे रूपहानिः सामान्यरूपेणैव भेदसाधकत्वमिति नियमात् असंबंधः समवायाभावः १

श्रि० चं०
त० टी०
१९ १४

॥ अनुद्भूतत्वं ३

तत्वेपि संकरः तदुक्तं किरणावल्यामुदयनाचार्यैः व्य-
क्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः रूपहानिरसंबं-
धो जातिबाधकसंग्रहः इति तस्मात्तत्र चोद्भूतत्वाभाववत्
त्वे उद्भूतत्वं च प्रत्यक्षयोग्यरूपरसगंधस्पर्शसंयोगा-
द्यन्यतमत्वमित्यलमप्रस्तुतविचारेण एवं घटमपि सु-
रभ्यसुरभिकपालजन्यघटे परस्परप्रतिबंधेन गं-
धानुत्पत्तेरव्याप्तिः न च तादृशघटे गंधप्रतीतेस्त-
त्र गंध एवास्तीति वाच्यं अवयवगंधस्यैव तत्र भाना-
गीकारादिति चेन्न गंधसमानाधिकरणजलत्वा-
समानाधिकरणजातिमत्त्वस्य विवक्षितत्वात् जलादावति-

विव २

॥ ननु सुरभ्यसुरभिकपालजन्यघटे कुतो न गंधः इति चेन्न [illegible] प्रतिबंधकः एवं [illegible] समवायेन घटे असुरभिगंधं प्रति [illegible] प्रतिबंधात् [illegible]

॥ १४ ॥

व्याप्तिवारणाय जलत्वेति तेजोवारणाय गंधवत्वेत्यादि पृ-
मो॰ २ थिवीतेजोद्वित्वमादाय तेजसि दोषवारणाय जातिपदं एतेन
नाद्यक्षणोत्पन्नघटेऽव्याप्तिः परास्ता गंधवतीति सत्वे सुरभि-
वोः संबंधसत्वे पृथ्वीसंबंधाभावेन गंधवतीत्यभावस्यापत्त ।
यव्यतिरेकाभ्यां पृथ्वीगंधस्यैव जले प्रतीतिर्बोध्याण ।
वंवायावपि ननु देवपूजांतरस्य कस्तूरीकुसुमसंबद्धत्वे
नस्यैतेहे पूतत्संबंधाभावान्न गंधवतीत्यनुपपत्तिः ना
च वायावानीतत्र्यणुकादिसंबंधोस्त्येवेति वाच्यं कस्तू-
र्याः स्थूलतापत्तेः कुसुमस्य च छिद्रापत्तेरिति चेन्ना
मोक्तदृष्टविशेषेण पूर्वत्र्यणुकांतरोत्पत्तेः कर्पूरादौ ।

६॥ अन्यूनानतिरिक्तवृत्तित्वं लक्षणेऽपि विवक्षितं लक्षणस्यापि लक्षतावच्छेदकत्वं स्याद्यतः किंचिदित्यनेनास्य

तं ५

वद्दृष्टविशेषाभावान्न्यूनत्वेऽव्याप्त्यतिव्याप्ती स्यातामिति पृथिवीनिष्ठलक्षणस्य ननु लक्षणस्य किं लक्षणमिति चेल्लक्ष्यतावच्छेदकसमनियतत्वमित्य् एवं हि अत्र पृथिवीलक्ष्यत्वात् इति लक्ष्यतावच्छेदकं पृथिवीत्वं तत्समनियतत्वं गन्धवत्त्वमिति लक्षणस्य समन्वयः अवच्छेदकं च स्वरूपसंबन्धविशेषः अन्यूनानतिरिक्तवृत्तित्वमित्यपि केचित् समनियतत्वं च तद्व्याप्यत्वे सति तद्व्यापकत्वं वर्तते च गन्धवत्त्वे यत्र गन्धवत्त्वं तत्र पृथिवीत्वमिति तद्व्याप्यत्वं यत्र पृथिवीत्वं तत्र गन्धवत्त्वमिति तद्व्यापकत्वं च यस्य च यत्समव्याप्त्या नियतं तद्व्याप्यत्वमिति सतत्व्यवच्छेदके व्याप्यस्यैव च न पूर्वं व्यापकस्य ततः परस्परव्याप्त्यैवहितात्र व्याप्तिः स्फुटी भवति इत्याह इति ननु लक्षणा

॥ स्यात् किं प्रयोजनमिति चेदितरभेदज्ञानमिति विह्नि न चै-
वं सतीतरभेदात्मिकाया व्यावृत्तेरपि पृथिव्यसाधारणा ।
धर्मत्वेन लक्षणत्वमस्त्विति तथा च पृथिवीतरभेद- असाधारणधर्मस्य प्रयोजनाप्रसिद्धेः ४
वतीतरभेदादित्यनुमानासंभवेन तस्याः प्रयोजनाप्रसि-
द्धेः एवं जगादितरस्यैवाशक्तिद्यानलक्षणाभिधाने यत्व-
स्यापीति वाच्यं असाधारणधर्मो हि द्विविधः व्यावर्त्त-
क ४ को व्यावर्त्तश्च तत्र व्यावर्त्तकरूपासाधारणधर्मस्यैव
लक्षणत्वात् तस्य च व्यावृत्तिरूपप्रयोजनदर्शनात् अ-
थैवं सति लक्षणलक्षणस्याव्यावर्त्तकेऽव्याप्तिः व्यावृत्तेः ति २
स्तपृथिवीत्वसमनियतत्वात् ज्ञेयत्वस्य च पदार्थत्वसम

सि० चं०
तं० टी०
१६

नियतत्वात् इति चेन्नैवं तद्भिन्नस्यापि लक्षणे निवेशात्
तथा च लक्ष्यतावच्छेदकसमनियतत्वे सति ज्ञेयत्वा
दिभिन्नत्वं लक्षणस्य लक्षणमिति फलितं स्वस्मि ।
न्स्वभेदानंगीकारेण ज्ञेयत्वादौ ज्ञेयत्वाभिन्नत्वस्या । टि३
संभवात् यदि चासाधारणधर्ममात्रं लक्षणम् इति ।
सिद्धान्तव्याघातः एवं ज्ञेयत्वादिके पदार्थसामान्य ।
लक्षणमिति पूर्वोक्तासंगतिश्चाशंक्य तत्तदसत्त्वेसा
धारणधर्ममात्रं लक्षणं तस्य च व्यावृत्तिर्वादिपदस्थ्वा ।
जगदादिरिति व्यवहारो वा प्रयोजनमिति मतमतद् ।
त्के व्यावृत्तिव्यवहारो वा लक्षणस्य प्रयोजनमिति इति ल ।
क्षणलक्षणनिरूपणम् ॥ शिष्यो विभजते सेति द्वैवि ।

इतः परं प्रयोजनाभावाज्ज्ञेयत्वा
दिभिन्नत्वमनुपादेयमेव २ ॥

१६

ननु ज्ञेयत्वाभाववति ज्ञेयत्वादिभिन्नत्व साध्यावृत्तित्वमिति यतः स्वस्मिन् स्वभिन्नत्वाप्रसिद्धिरिति ॥३॥

[illegible]

ध्वंसप्रयुक्तत्वादवृत्ति नित्येति नित्यत्वं ध्वंसाभिन्नत्वे सति ध्वंसाप्र-
तियोगित्वं अनित्यत्वं ध्वंसप्रतियोगित्वं परमाणुरूपे-
ति ननु परमाणुसद्भावे किं मानमिति चेदुच्यते गवा-
क्षरन्ध्रे तरणिकिरणाभ्यसर्वतः सूक्ष्मपदं रज उपल-
भ्यते तत्त्र्यणुकमित्यभिधीयते तत्त्र्यणुकं सावयवं
जन्यं चाक्षुषद्रव्यत्वात् पटवदित्यनुमानेन त्र्यणुकावय-
वः सिद्ध्यति स एव द्व्यणुकः सोप्यवयवजन्यो महदार-
म्भकत्वात् कपालवदित्यनुमानेन तदवयवः सिद्ध्यति
स एव परमाणुरित्युच्यते अनवस्थाभिया अवयवधारा
नैरन्तरीक्रियते अन्यथा मेरुसर्षपयोरपि साम्यप्रसङ्गः।

सि॰चं॰
त॰टी॰
१७
17

वि परमाणोरनित्यत्वे ऽसमवायिकारणं भावकार्य्यत्वा-
त्तिप्रसंगः इति परमाणौ प्रमाणोपदर्शनम् अकार्य्यरूपेति श्रु
वयवविनी चेत्यपि बोध्यम् अत्र नास्तिकाः स्ववयवि स-
ध्यावेनमाने ऽयं घट इति प्रतीति हि परमाणुपुंजेष्वेवो-
पपद्यत इति तन्न परमाणूनामतीन्द्रियत्वेन घटस्या-
प्यतीन्द्रियत्वापत्तेः न चैकैकस्य केशस्य दूरे ऽप्रत्यक्षत्वे-
त्वेपि कथ्यत हि तत्समूहस्य प्रत्यक्षत्ववन्मिलितानां वाच्यम्
सन्निधानेनैकस्यापि केशस्य प्रत्यक्षत्वसंभवेन दृष्टान्त-
वैषम्यात् किं चायं घट इति ज्ञानविषयतायाः अनन्तप-
रमाणुकल्पने गौरवाच्चेति सारम् इति परमाणुपुंज-

कार्य्यरूपपृथ्वीं विभजते पुनरिति कार्य्यरूपेति विशेषणं ।
वमगेपि अविध्ये हेतुमाह शरीरेति भेदपदे शत्येकं योज्यं अ
त्मावच्छिन्नत्वे सति चेष्टाश्रयत्वं शरीरत्वं हस्तादिवारणा
य अत्यन्ते घटादिवारणाय विशेष्यं अन्त्यावयवित्वं च अ
वयवजन्यत्वे सत्यवयवाजनकत्वं अवयवित्वं च द्रव्यसमा
वायिकारणत्वं अवयवित्वं च जन्यद्रव्यत्वं चेष्टा चहिता
हितप्राप्तिपरिहारार्था क्रिया तदिदं शरीरं द्विविधं यो
निजमयोनिजं च शुक्रशोणितपरस्परमेलनजन्यं यो
तद्भिन्नमयोनिजं २ निजं आद्यमपि द्विविधं जरायुजमंडजं च गर्भावरकचर्म
पुटकं जरायुस्तज्जन्यं जरायुजं यथास्मदादीनां अ

सिं० चं०
त० टी०
१८

जं पक्ष्यादीनां अयोनिजं त्रिधा स्वेदजमुद्भिज्जमदृष्टवि-
शेषजन्यं च स्वेदजं यूकालि[illegible]दीनां उद्भिज्जं वृक्षादी- । वृक्षादीनां २
नां अदृष्टविशेषजन्यं मन्वादीनां ननु शरीरत्वे किंमान-
प्राणानामध्वायु ४ मितिचेच्छृणु वृक्षः शरीरी सर्वाध्यात्मिकवायुसंबंधादि-
न्यनुमाने ननु तत्रैव मानं नन व पूयाम इति चेद्धृतः आध्या-
त्मिकवायुसंबंधवान् छिन्नपादिमत्वादित्यनुमानेक-
त्वयमन्वादीनामयोनिजत्वे च ब्रह्मणो मानसाः मन्वादे-
यः पुत्रा इति श्रुतिः प्रमाणं इति शरीरे सामान्यनिरूपणं ।
शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारण-
मनःसंयोगाश्रयत्वमिन्द्रियत्वं शब्देतरेत्युद्भूतविशेष
रूपं गंधो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः बुद्ध्यादिभावनांतश्च शब्दो विशे- इंद्रियनिरूपणं

गुणाः घटनिष्ठरूपादयस्तद्रूनाश्रयत्वं ज्ञानकारणीभूतो
यो मनःसंयोगस्तदाश्रयत्वं च चक्षुरादावस्तीति लक्षणा
समन्वयः भवत्येवेन्द्रियमनःसंयोगः तथा आत्मा मनसा ज्ञानकारणं ३
संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेन ततः प्रत्यक्षमिति निय २५
मात् आत्मकारणायमत्वंते कालवारणाविशेष्य आ
त्रेऽव्याप्तिवारणाय श्राहूतरेति चक्षुरादौ तद्वारणायेत्रा
ध्येति इन्द्रियार्थसंयोगाश्रयत्वस्य चक्षुरादौ सत्वाद्धि विशेष
गुणेति स्वध्वंसकारणीभूतः कालमनःसंयोगस्तदा
श्रयत्वं कालस्येति ज्ञानपदं इन्द्रियावयवार्थावयवयोः सन्नि
कर्षोपि ज्ञानकारणं तदाश्रयत्वमिन्द्रियावयवे गतया

॥ इत्युक्तवस्तुपरिमाणग्रहापत्तेः १

सि॰ चं॰
न॰ टी॰
२५
19

द्वाकाले रूपं नास्तीति प्रत्ययं भवति चक्षुःसंयुक्तविशेषणा
ने तायाः कारणत्वेन तद्घटकीभूतसंयोगाप्रयत्वे कालेना
तेततेनमनःपदं न चात्मवारणायात्मान्यत्वमेव निवेश्य
तामिति शूकामूत्वञ्ज्ञानोयोगस्य ज्ञानकारणतायत्तो
अतिव्याप्तेर्वैम्क्षि प त्वविशेषणात् इति द्विपसामान्यनिरूपणं ॥ भोतोपयो साधन ५
ग्रीविषयः भोगस्तु सुखदुःखान्यतरसाक्षात्कारः यद्वे
तल्लक्षणं शरीरत्वावच्छिन्ना श्रमिति विभाव्यते तच्छरी
रेंद्रियभिन्नत्वमेव तदनुसार वस्तुतस्तु शरीरादेकमयि
विषय एव भेदेन कीर्तनं तु बालधीवैशद्याय इति विष
यसामान्यनिरूपणं ॥ पार्थिवं शरीरं दर्शयति शरीरमिति
श्रादिपदेन पश्वादीनां परिग्रहः गंधवच्छरीरं पार्थिवमिति

प्रकर्षीभूताप ३

तल्लक्षणं बोध्यम् अत्र जलाद्यंशसामर्थ्यत्वार्थं च भौतिकत्वव्यव
हारः पार्थिवभागस्य मुख्यत्वात्पार्थिवत्वम् ॥ एवमन्यत्रा
पि पार्थिवेंद्रियस्य लक्षणमाह इंद्रियमिति चक्षुरादावति संयुक्तसमवाये १
प्रसंगवारणाय गंधग्राहकमिति सन्निकर्षे व्यभिचारवा
रणायेंद्रियमिति अथवा पार्थिवेंद्रियं दर्शयति गंधवदिंद्रि
यं पार्थिवेंद्रियमिति तल्लक्षणं बोध्यम् एवमग्रेपि ननु पा
र्थिवेंद्रियं निष्प्रयोजनत्वा[illegible]दलक्षणीयमित्याशंकां
निरसितुं तत्प्रयोजन[illegible]माह तथा च गंधग्रह एव तत्प्र गंधग्राहकत्वे च ३
गंधग्राहकमिति २ योजनमस्ति तज्जनकत्वात्पार्थिवेंद्रियमावश्यकमेवेति
भावः इदमुपलक्षणं येनेंद्रियेण यद्गृह्यते तेनेंद्रियेणा

गंधविषयकज्ञानजनकम् २

तन्निष्ठजातिः तदभावश्च गृह्यतेति नियमात् गंधत्वादेर
पि ग्राहकमित्यर्थः ननु गंधग्राहकत्वेन घ्राणं नाम।
कमिंद्रियं तथापि तस्य पार्थिवत्वे किं मानमिति चेन्नैव। गंधविषयकज्ञान
घ्राणेंद्रियं पार्थिवं रूपादिषु मध्ये गंधस्यैवाभिव्यंज जनकत्वात् ॥४॥
कत्वात्कुंकुमगंधाभिव्यंजकगोघृतादिवद्वायूपनीत।
द्वे६ सुरभिपार्थिवभागावेत्यनुमानस्यैवमानत्वात् नव।
मृत्पात्रे ३ शरावगतगंधव्यंजकजलेव्यभिचारवारणायैवका
रः मध्यांतोपपादनेन घ्राणस्य गंधत्वव्यंजकत्वेपि।
न क्षतिः तस्य संकेतमाह घ्राणमिति घ्राणपदप्रवृत्ति।
वाद्यमितिभावः तदाश्रयमाह नासाग्रेति पार्थिवंवि।

षयं स्पर्शोपत्तिविषय इति शब्दादिनापुष्पादिपरिग्रहः गं
धवान्विषयः पार्थिवविषय इति तल्लक्षणं बोध्यम् इ
ति पार्थिवगंधः जलेलक्षयति शीतेति तेन च चंद्रा
ने शीतेति शिलातलमित्यादि प्रतीतेः पृथिव्यामति
व्याप्तिरितिवाच्यं जलसमवेतस्पर्शस्यैवसमवा स्व
यिसंयोगसंबंधेन तत्र भानात् जलं विभजते ता
इति शरीरमिति इदमयोनिजमेव एवमुत्तरत्रापि
२२ ननु जलीयशरीरस्य नरवदंतकरणाद्यसंभवेनाहार
विहाराद्यसंभवात्कथं भोगायतनत्वमुपपद्यत इति

श्री०चं०
त०टी०
॥२१॥

मैवं मंस्याः पार्थिवादिभागसंमिश्रितत्वेन करकादि
वत्तघनीभूयघट्टीभूतस्य तस्य ताल्वादिवाग्व्यापारसंभ
वेनाहारविहारादिसंभवाद्भोगायतनत्वोपपत्तेः॥
एवमुक्तरत्रापि इन्द्रियमिति न नु रसनेन्द्रियस्य जलीयत्वे कि
म्मानमिति चेच्छ्रूयतां रसनेन्द्रियं जलीयं रूपादिषु पंचसु
के९ मध्ये रसस्यैवाभिव्यंजकत्वाल्लालादिवदित्यनुमानं न हरी
तक्यामलकादौ व्यभिचारवारणायैवकारः तस्य जल
माधुर्यव्यंजकत्ववत् कुसुंभादिरूपस्यापि व्यंजकत्वात्
शेषं सुगमं विषय इति अथादिना तद्धि हिमकरकादीनां॥२
संग्रहः अथ हिमकरकादीनां जलत्वे तन्नैमित्तिकद्रवा

२१

त्वं न स्यादिति चेत्कोवा नेति वृत्तेश्च दृष्टविशेषगुणाघनीभावात्
सांसिद्धिकद्रवत्वप्रतिबंधमात्रकल्पनादिति जलगुणः ।
तेजसो लक्षणमाह उष्णेति उष्णं जलमिति धीस्तु जलांतर्ग
क्षितिष्ट ४ ततेजउष्णस्पर्शस्यैवेति तत्र नातिव्याप्तिः चंद्रकिरणादौ त
दंतर्वर्तिवारिस्पर्शाभिभूतत्वादुष्णस्पर्शस्यानुपलंभः ।
चक्षुरादावनुद्भूतत्वात्तस्य तथात्वे तेजो विभजते तदिति च
क्षुषस्तैजसत्वे चैवं चक्षु तैजसं रूपादिपंचसु मध्ये रूपस्यैवा
भिव्यंजकत्वात् दीपप्रभा वदित्यनुमानं प्रमाणमाहरीत्ता ।
कयादौ व्यभिचारवारणायैवकारः रूपग्राहकमिति तिद्रूमपा ।

लक्षणं महत्त्वोद्भूतरूपस्पर्शवद्द्रव्यतद्वृत्तिकर्मसामान्यसमवा
यसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्ने-
४३ हानामपि ग्राहकमिति द्रष्टव्यं ननु बहिरिन्द्रियस्य वस्तुप्राप्यप्र-
काशकारित्वनियमेन कनीनिकावर्त्तिचक्षुषा कथं घटा
दीनां प्राप्तिरिति चेन्नैवं दीपप्रभायाइव तस्यापि विकाशशा
लित्वेन तत्प्राप्तिसंभवात् न च शाखाचन्द्रमसोस्तुल्यकालग्र-
हणानुपपत्तिरिति वाच्यं शाखाचन्द्रमसोर्युगपत्प्रत्ययाभी
कमलशतपत्रे ति प्रतीतेर्भ्रमत्वं तेजसोतिशीघ्रतवेगशालित्वेन ग्रहणावि-
युगपद्भिन-
द्धिरितिवत् २॥ लंबनेनैव तद्ग्रहणात् ॥ प्रशस्तपादभाष्यानुसारेणावि-

षयस्य चानुर्विध्यमाह विषय इति अन्यत्र तु उद्भूतस्पर्शवान् अनु- उद्भूतरूपो १
चतुरुणर्हिः २ द्भूतरूपानुद्भूतस्पर्शवानुद्भूतरूपोनुद्भूतस्पर्शवानुद्भूतस्य ननु वारितेजः २ गत
स्पर्शानुद्भूतरूपवानिति चातुर्विध्ये हेतुमाह भौमेति भेदादिति-
पदस्यैकमभिसंबध्यते तत्र भौमम् उदाहरति भौममिति पा-
र्थिवमात्रेंधनं तेजो भौमं वह्न्यादिकमित्यत्रादिपदेन खद्योत-
गततेजः संग्रहतेः परिग्रहः दिव्यं दर्शयति दिव्यमिति जलमा-
त्रेंधनं तेजो दिव्यं क्वचिदबिंधनं दिव्यमित्यपि पाठः आदिना-
र्कचंद्रादीनां परिग्रहः पार्थिवजलोभयेंधनं तेजउदर्यं तदेवा-
भिधीयते भुक्तेति भुक्तस्यान्नादेः पीतस्य जलस्य परिणामो-
जीर्णतातस्य हेतुरौदर्यमित्यर्थः तत एव तदुभयेंधनं स्या-

कारजेदृष्टीयतिश्चाकारजमिति अविबंधनंतेजश्चाकारजेसुवर्णादि
कमित्यत्रादिनारजतादेः परिग्रहः अथसुवर्णवादः ननुसुव
र्णं पार्थिवंपीतत्वाद्धरिद्रादिवदितिचेन्नतत्रघृतजतुप्रभृतिष्व
त्यंतानलसंयोगेसतिद्रवत्वनाशोपलंभेनजलादिरूपप्रतिबंध मे १
केसतितदनुपलंभेनपार्थिवद्रवत्वनाशप्रतिबंधकाभावविशि प्रति ५
ष्टात्यंतानलसंयोगस्यकारणत्वेनसुवर्णेतादृशसंयोगेसति
द्रवत्वनाशापत्तेः प्रतिबंधकत्वंचकारणीभूताभावप्रतियोगि
त्वंभवतिजलेपार्थिवद्रवत्वनाशप्रतिकारणीभूतोयोभाव
जलाभावस्तत्प्रतियोगिमीमांसकास्तुतमइवसुवर्णमतिरि
मितिरिक्तंद्रव्यंदृष्टाकरेतदपिनयुक्तंतेषुतत्रभावेसंभवत्यतिरि

अतिरिक्तधर्मिकल्पनातो क्लृप्तधर्मिणि धर्मिकल्पनस्यैव लघीयस्त्वादित्याहुः ॥

क्लृप्तद्रव्यकल्पनापत्तेरन्याय्यत्वात् ननु सुवर्णस्य तैजसत्वे किं मा-
नमिति चेदत्र ब्रूमः सुवर्णं तैजसं असति प्रतिबंधकात्यंताभावविशिष्टा-
त्यंतानलसंयोगेप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात्
घृतमित्यर्थः १ यन्नैवं तन्नैवं यथा पार्थिवमिति पार्थिवरूपस्पर्शाभ्यां ^
तिरस्कारात् ५ तन्निष्ठाभास्वररूपोष्णस्पर्शयोरभिभवादग्रहः इति संक्षेपः
इति तेजोग्रंथः वायुं लक्षयति रूपरहितेति घटादिवारणाय
यविशेषणं आकाशादिवारणाय विशेष्यं अथ वायुप्र-
त्यक्षवादः ननु वायुसद्भावे किं मानमिति चेदत्र प्रांचः ^
घटपटादि १ विषयतासंबंधेन वहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति समवा^
॥सलिलांतर्गतस्पर्शविषयव्यभिचारवारणाय संयोगांते ननु महत्त्वस्य

॥इति केचित्तन्न वनस्पतीव ८ आहुः ।

[illegible]

यसंबंधेन महत्त्वविशिष्टोद्भूतरूपवदुद्भूतस्पर्शस्य कारणत्वं एवं च
सति वायौ तदभावान्न वायुर्न प्रत्यक्षः किंत्वनुमेयः तथा हि यो ।
यं वायुः वाति सत्यनुष्णाशीतस्पर्शो लोके प्रतीयते सः स्पर्शः
क्वचिदाश्रितः गुणत्वाद्रूपवदित्यनुमानेन यत्किंचिद्द्र
व्याश्रितसिद्धाविति तदेव वायुरित्युच्यते न च तत्पृथिवी भवितुम ।
र्हत्यनुद्भूतस्पर्शवत्त्वात् पार्थिवस्योद्भूतरूपवत्त्वनियमात् ना ।
पि जलतेजसी तत्रानुष्णाशीतस्पर्शाभावात् नाप्यका ।
शादिचतुष्टयं तस्य विभुत्वेन सर्वत्र तादृशस्पर्शप्रत्यक्षाप । अप्रत्यक्षत्वापत्तेः २
त्तेः नापि मनः तस्याणुत्वेन स्पर्शस्याप्यनध्यक्षत्वापत्तेरित्याहुः न
वीनास्तु वहिर्द्रव्यप्रत्यक्षं प्रति महत्त्वविशिष्टोद्भूतविभुख्याहेतोवि

सो॰ शेषगुणः महत्त्वविशिष्टोद्भूतरूपोद्भूतस्पर्शान्यतरत्वा
कारणं एवं सति वायुरपि प्रत्यक्ष एव न त्वत्राह शगुणा
स्य महत्त्वविशिष्टोद्भूतस्पर्शस्य सत्वात् इतरथा वायु
स्पर्शामि प्रभां पश्यामि तप्तजले तेजः स्पर्शामी
त्यनुभवापलापप्रसंगः नचायं भ्रमः जलं स्पर्शा
मीत्यनुभवस्यापि तथात्वापत्तेः ननु द्रव्यचाक्षुष
प्रति द्रव्यस्पार्शनं प्रति च प्रत्येकं किं कारणमिति
चेदाद्ये महत्त्वविशिष्टोद्भूतरूपं द्वितीये महत्त्व
विशिष्टोद्भूतस्पर्शः इत्यावदाते ॥ वायुर्विभजते
सच द्विविध इति शरीरमिति तच्च पिशुनानामपि स्य

नचायं पक्षो गरीयान् प्राचां मते द्रव्यस्पार्शनकार
णतया [illegible] त्वं त्वात् ॥२॥ क्षेप ॥

सि० चं०
त० टी०
२५॥

।शीग्राहकमिति इदमुपलक्षणं महत्त्वोद्भूतरूपस्य
।शीतवत्त्वद्रव्यतद्वृत्तिकर्मसामान्यसमवायसंख्यापा-
।रिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहा-
।नामपि ग्राहकं त्वगिति त्वगिन्द्रियमित्यर्थः तस्य वा-
।यवीयत्वे त्वगिन्द्रियं वायवीयं रूपादिषु मध्ये
।स्पर्शस्यैवाभिव्यंजकत्वात् अंगसंगिसलिलशैत्या- स्वेद: ६
भिव्यंजकव्यजनपवनवदित्यनुमानं मानं सलिला-
शैत्यव्यंजके मनसि शिलादौ चातिप्रसक्तिवारणायैवा-
वेल कारः इत्यादीत्यत्रादिपदेन लतादीनां परिग्रहः ननु-
प्राणस्याधिकस्य सत्वात्कुतो न कृतस्तद्विभाग इत्यतआ-
ह शरीरान्तरिति तथा च विषयवायोस्तस्यान्तर्भाव इत्य-

हृदि प्राणो गुदेऽपानः समानो नाभिमंडले उदानः कंठदेशस्थो व्यानः सर्वशरीरगः ॥४३॥ टी॥

र्थः अपानादेरतिरिक्तत्वमाशंक्य प्राणे तस्यांतर्भावमा-
घ्नेसचेति प्राणास्त्विति एकोपीति एक एव प्राणो हृ-
दयादिरूपोपाधिभेदात्प्राणोपानादिशब्दैर्व्यवह्रिय-
त इत्यर्थः तदुक्तं अथवा मुखनासिकाभ्यां निर्गम-
नप्रवेशनात्प्राणः मलादेरधोनयनादपानः अ-
भुक्तपरिणामजाठरानलस्य समुन्नयनात्समानः
अन्नादेरूर्ध्वनयनादुदानः नाडीमुखेषु विततननाद्
व्यानः इति क्रियारूपोपाधिभेदात्तथा व्यवह्रियत इ [त्यर्थः २]
एवं नागकूर्मकृकलदेवदत्तधनंजयाख्या वायवः

सि० चं०
त० टी०
२६

नामयपिशाचोंतर्भावः नाग उद्गारहेतुः कूर्म उन्मील
नस्य कृकलः क्षुधायाः देवदत्तो विजृंभणस्य धनंजय
योपि पोषणस्येति बोध्यं इति वायुग्रंथः इदानीं का
र्य्यद्रव्यस्योत्पत्तिविनाशक्रमं आचष्टे हे परमेश्वर
स्य चिकीर्षावशात्परमाणुषु कर्मोत्पत्तिः ततः तत
द्वयोः परमाण्वोः संयोगस्ततो द्व्यणुकोत्पत्तिः तत्र
परमाणुः समवायिकारणं परमाणुद्वयसंयोगो
ऽसमवायिकारणं परमेश्वरस्तस्य ज्ञानेच्छाकृतयः
कालो दिक् प्रागभावो दृष्टप्रतिबंधकाभावश्च निमि
त्तकारणं एतेषां कार्यमात्र एव निमित्तमात्रत्वात् त

ने॰ १ उत्तरं त्रिषु द्व्यणुकेषु कर्म्मोत्पत्तिस्ततस्तेषां संयोगस्तत ए॥२
स्त्र्यणुकोत्पत्तिः एवं चत्तुरकाद्युत्पत्तिक्रमेण महा
हापृथिवी महत्य आपः महत्तेजो महान्वायुरुत्पद्यते
ननु त्रिभिः परमाणुभिः कुतो न द्व्यणुकमारभ्यते
द्व्यणुकद्वयेन वा कुतो न त्र्यणुकमुत्पद्यते इति चेन्ना
प्रथमस्य द्रव्यारंभकत्वे गौरवात् प्रमाणाभावाच्च
परमाणुत्रयस्य ६ द्वितीयस्य तथात्वे त्र्यणुकमहत्वानुपपत्तेः कार्य्य
महत्वे कारणबहुत्वस्य कारणमहत्वस्य कारणत्वा
त् एवं परमेश्वरस्य कार्य्यद्रव्यसंजिहीर्षावशात्त्य

रमाणुषु कर्मोत्पत्तिः ततः परमाणुद्वयविभागः ततः प
रमाणुद्वयसंयोगनाशस्ततो द्व्यणुकनाशस्ततस्त्र्यणु
कनाशः एवं चतुरणुकादिनाशक्रमेण महापृथिव्या
दीनां नाशः अयमेवान्तरप्रलयः सर्वकार्यद्रव्यध्वंसस्यै
वावान्तरप्रलयत्वात् महाप्रलयस्तु सर्वभावकार्य
ध्वंसः भावकार्यं चानित्यद्रव्यमनित्यगुणाः कर्म च
किं पुनः सृष्टिप्रलयसद्भावे मिति चेत् धाता यथा मान
पूर्वमकल्पयदित्यादिश्रुतिः मीमांसकास्तु संसारप्रवा
हस्य बीजांकुरन्यायेनानादित्वादनन्तत्वाच्च प्रलया
सद्भावे मानाभाव इत्याहुः अत्र प्राञ्चः क्वचित्सम्भवा

यिकारणनाशाद्द्रव्यनाशः क्वचिदसमवायिकारणनाश
द्द्रव्यनाशमंगीचक्रुः नव्यास्तु लाघवात्सर्वत्राऽसमवा^ विस्तारेण ३
द्रव्यनाशं ३ यिकारणनाशात्तेमुररीचक्रुरित्यलंपल्लवेन इतिका
र्यद्रव्योत्पत्तिविनाशक्रमनिरूपणम्॥ आकाशल
क्षयति शब्दगुणमिति शब्दो गुणो यस्य तत्तथा यद्यपि प ५
शब्दवत्त्वमेव लक्षणमुचितं तथापि महतां मते श^
ब्दस्य द्रव्यत्वं तन्निरासार्थं गुणपदमुपात्तं क्वचिच्छब्द^
गुणमाकाशमित्यपि पाठः गुणमेव शब्दगुणमिति क ३
क ३ स्वार्थिकः यद्वा शब्दगुणं करोति जनयतीति शब्दगुणं
यतीति वा शब्दगुणकं शब्दसमवायिमिति यावत् एते कारण १

सि॰ चं॰
त॰ टी॰
२८॥

॥समवायिकारणाजन्यत्वात् २

नाकाशे प्रमाणमपि दर्शितं तथाहि शब्दोऽष्टद्रव्यातिरि-
क्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति समवायि-
कारणकत्वात् यन्नैवं तन्नैवं यथा रूपमिति परिशेषा-
नुमानेन तादृशद्रव्यविषयाकाशः सिध्यति रूपा-
दिवारणाय सत्यंतं रूपत्वादिवारणाय विशेष्यं परिशे-
षश्च प्रसक्तस्य प्रतिषेधेऽन्यत्राप्रसंगात्परिशिष्यमा-
णे संप्रत्ययः न च विशेष्यासिद्धिः शब्दः समवायिकार-
णकः जन्यगुणत्वात् पृथिवीरूपवदित्यनुमानेन त-
त्सिद्धेः न च विशेषणासिद्धिरपि शब्दोऽष्टद्रव्यनाश्रि-
तः श्रोत्रग्राह्यत्वात् शब्दत्ववदित्यनुमानेन तस्यापि
सिद्धेः ननु तस्य गुणत्वमेव किंमानमिति चेत् शब्दो

अष्टद्रव्यातिरिक्त द्रव्यत्वेन॥४॥

श्रोत्रजन्यज्ञानविषयत्वात् २

मि

आत्मनित्यत्वे चाव्यवहारात्मायानिलत्वेति १ ॥ संख्यादिवत्तिद्यानिर्वाह्यानामह्यकेंद्रियमात्रेति १

गुणाः अनित्यत्वे सत्येकेंद्रियग्राह्यजातीयत्वाद् रूपवदित्य
नुमानं मानं अणुकाद्यावनैकांतिकत्ववारणाय जाती
येति अन्यत्कृत्यस्य पृथ्व्याकाशस्य पृथिव्यादिवदनेकत्वे
मानाभावादाह तच्चैकमिति च स्वर्थे न चाकाशस्यैक
त्वे घटाकाशो मठाकाश इति व्यपदेशः कथमिति वा
च्यं घटादिरूपोपाधिभेदेन ताहश व्यपदेशात् सर्वत्र
शब्दोपलंभादाकाशस्य विभुत्वमावश्यकमिति वृत्ते वि
भ्विति आकाशस्य विभुत्वादेव नित्यत्वे सत्स्यतीत्याह नित्यं
चेति नन्वात्मन आकाशः संभूत इति वेदेनाकाशस्य जन्य
त्वप्रतिपादनात्कथं तन्नित्यं यज्जन्यं तदनित्यमिति व्या

भावादेरनियज्जन्यमित्यर्थः तेन

॥ विनाशी १

॥ उत्पत्तिवशादित्यर्थः। शब्दमूर्त्तत्वात् १॥

त्रेरिति चेन्न संभूतशपस्य ब्रह्मांडोपाधिवशादभिव्यक्तेः उत्प
थीकत्वात् इदमत्र चिंत्यं आकाशस्य शरीरं नोवर्त्तते वर्त्ति
द्रियमस्ति तच्च श्रोत्रं शब्दधीजनकमिंद्रियं श्रोत्रं श्रोत्रेंद्रि नद्गुणग्राहकस्य ३
यस्याकाशत्वं कथमिति चेन्न यदिंद्रियं रूपादिषु मध्ये य
गुणं गृह्णाति तदिंद्रियं तद्गुणयुक्तमिति नियमाच्छ्रोत्रस्य
शब्दग्राहकत्वेन तत्राकाशत्वस्याबाधितत्वात् अथस
ति कुड्ये सर्वं चित्रमिति न्यायेन सर्वमिदं तद्देव संभवति।
यदींद्रियं स्यात्तत्रैव माानं नलभामहे इति चेन्न याया
इंद्रियत्वे ३ क्रियासासाकरणसाध्या इति व्याप्तेर्वास्यादि रूपकरणसा
घ्यच्छिदिक्रियादौ दृष्टत्वेन गंधाद्युपलंभः करणसा

॥ कार्यतो १॥ कुठार २

कार्यत्वात्

ध्यः क्रियात्वाच्छिदिक्रियावदित्यनुमानात्तादृशाकरणत्वे
नेंद्रियस्य सिद्धेः इत्याकाशग्रंथः ॥ कालं लक्षयति अ
तीतेति अतीत इत्यादिर्यो व्यवहारः अतीतो भविष्यन्वर्त्त
मान इत्यात्मकस्तस्यासाधारणहेतुः काल इत्यर्थः
नन्विदं लक्षणमाकाशेऽतिव्याप्तं व्यवहारस्य शब्दा
त्मकत्वादिति चेन्न अत्र हेतुपदेन निमित्तहेतोर्विवक्षि
तत्वात् आकाशस्य शब्दसमवायिकारणत्वान्ना
तिव्याप्तिः न चैवमपि कंठताल्वाद्यभिघातेतिव्या
प्तिरिति वाच्यम् विभुत्वस्यापि निवेशात् अथेदं
लक्षणं कथं महाकाले अतीत इत्यादिव्यवहारस्य

सि० चं०
त० टी०
३०

हृतत्वात् १

रविक्रियादिरूपखंडकालनियम्यत्वादिति मैवं मंस्थाः
महाकालेप्युपाधिभेदेन तादृशव्यवहारभेदसंभवात्
अतीतत्वं च वर्त्तमानध्वंसप्रतियोगित्वं भविष्यत्वं च व
र्त्तमानप्रागभावप्रतियोगित्वं वर्त्तमानत्वं च तदुभयमानो
पाधित्वं महाकाले अतीतत्वादिकं दर्शितप्रायमित्य
लमतिकठिनविषयकांतारप्रदर्शनेन शिशूनां श्रा
थकाले किं मानमिति चेच्छृणु बहुतरदिवाकरक्रि
याविशिष्टशरीरज्ञानात्कालिकपरत्वोत्पत्तिरिति
सिद्धांतः तत्र ज्ञाने विशेषणविशेष्योभयसंबंधघ
टकमापेक्ष्य साक्षात्संबंधाभावे सति विशिष्टज्ञाना

संवद्व ५

॥ उक्तविशिष्टशरीरज्ञाने २

स्वक्रियातत्समवायिदिवाकर तात्स्पुवकृत्तःकालस्तत्संयोगः ॥ तापकत्वासंभवात् ४

त्वाल्लोहितः स्फटिकज्ञानवदित्यनुमानेन तादृशसंबंधघटक
न विषयाकालःसिद्ध्यति चतादृशसंबंधघटकस्याकाशस्यात्मा
वाभवितुमर्हति तयोःशब्दज्ञानाश्रयत्वेनैव धर्मिग्राहक
मानसिद्धत्वेन रविक्रियापनाकत्वासंभवात् तादृशसंबंध प४
घ्नसमवायिसंयुक्तसंयोगःसचजगदाधारःकार्य्यमा
त्रैनिमित्तकारणंचेतिमहार्णवप्राकृतस्यजगदाधार मे६
त्वेनकार्य्यमात्रंप्रतिनिमित्तकारणत्वेनकालःसर्ववानिदा
नींघटोभवतीतिप्रतीतिरेवमानं क्षणदिनमाससंख्योपाधिभे दिव्यवहार २
भेदानुविधायित्वात्कालस्यैकांचनिरपराधमितिसंबंध

॥ निमित्तकारणत्वप्रामाण्यं ॥ व्यातिरिक्तसर्ववानित्यर्थः ३

सि० चं०
त० टी०
३१

ते सचेति सर्वत्र कार्योत्पत्तेर्विभुत्वमप्येष्टव्यमित्यभिप्रेते
विभुरिति विभुत्वादेव नित्यत्वं संपद्यत इत्याशयेन नित्यश्चेति ।
इति कालग्रंथः दिग्निरूपयति प्राच्यादीति इयं प्राचीयम ॥ प्रमाणं ॥
यमुदीचीयं वाचीयं प्रतीचीत्यादिव्यवहारासाधारणं कारणं दिगित्यर्थः ।
ननु दिशि किं मानमिति चेदत्रानुमानम् अत्र यप्रतिज्ञामात्रेण तत्र ५
नार्थसिद्धिरिति चेन्नैवं बहुतरमूर्त्तसंयोगाविशिष्टपिंड
ज्ञानाद्वैशिष्ट्यकपरत्वोत्पत्तिरिति निर्विवादं एवं च तत्र ज्ञानं वि विं ३
शेषणाविशेष्ययोर्मध्यसंबंधघटकसापेक्षं साक्षात्संबंधाभा
वे सति विशिष्टज्ञानत्वादित्यनुमानस्य जागरूकत्वात् सं

॥ ननु दिश एकत्वे प्राचीत्यादिव्यवहारभेदः कथमिति चेन्न पत्रोट ।
रहुतरमूर्त्तसंयोगसमवायि दिक् तन्न संयोगः पिंडे ॥१॥

वंधस्य वहुतरमूर्त्तसंयोगस्य स्वं समवायि संयोगः तेन संबंधघटकादि-
कू सिद्ध्यति सा च जगदाधारा निखिलकार्यनिमित्तकारणं चेत्यभि-
हितमेवेति दिक् निखिलपदार्थवती इह घटो भवतीत्यादि निरंकुशप्र- निर्वाधाधीः
धीसत्त्वमानमिति मंतव्यं प्राचीत्यादिव्यवहारस्योपाधिभेदप्रयो- कृतत्वात् ४
ज्यत्वादिति एकैवेति वृत्ते सा चेति तथाहि यस्मादुदयाचलसन्निकृ-
ष्टं यन्मूर्त्तं तत्तस्य प्राची यथा प्रयागस्य काशी यस्मादुदयाचा-
लविप्रकृष्टं यन्मूर्त्तं तत्तस्य प्रतीची यथा गंगायाः पाटलपु-
सुमेरुः २ रस्य वा काशी यस्मात्कनकाचलविप्रकृष्टं यन्मूर्त्तं तत्तस्यावा-
ची यथा काश्या रामेश्वरं देतेनू । एवं खंडांतरे ॥ तदुक्तं सर्वेषां

यस्मात्कनकाचलसन्निकृष्टं यन्मूर्त्तं तत्तस्योदीची यथा रामेश्वरस्य काशी २

मेववर्षाणां मेरुरुत्तरतः स्थित इति एवं महादिक्पूर्वीमां मेवोपाधि।
मेद्भावाभावनाहृशाव्यवहारे बोध्यः इदं नु बोध्यं जन्य मात्रं वा
कालोपाधिः मूर्त्तमात्रं दिगुपाधिरिति इति दिग्ग्रंथः॥१०॥
आत्मानं निरूपयति ज्ञानाधिकरणमिति [redacted] समवायेन ज्ञा।
ज्ञानाधिकरणत्वं तेन कालेनातिव्याप्तिः आत्मानं विभजते
स इति परमात्मेति परमत्वमुत्कृष्टत्वं तच्च प्रकृते सृष्ट्यादिक
र्तृत्वं परमात्मजीवयोर्वैलक्षण्यमभिधत्ते तत्रेति परमात्म।
जीवयोर्मध्ये परमात्मा ईश्वरः सर्वज्ञश्च भवति सत्वेकएवेत्य।
र्थः नित्यज्ञानाधिकरणत्वं तल्लक्षणमवगन्तव्यं ग्रंथे ईश्वरे कथं
नित्यज्ञानमिति चेत्सर्गाद्यविसरे परमाणुनाहृणुकंका।

रिष्यामीति ज्ञानस्यावयुपपकत्वेन नष्टत्पादकत्वेन शरीरादिका न
रणाकलापस्य तद्रूपानीव्यतिरेकेणातस्य नित्यत्वमुररी
कुर्मः ईश्वरमीश्वरेच्छाकृत्योरपि अत्र चार्वाकाः ईश्वर
सद्भावे मानाभावः न च प्रत्यक्षं प्रमाणमिति वक्तव्यं
नैयायिकानां प तार्किकाणां मते तस्य नीरूपस्य स्पर्शद्रव्यत्वेन वा ह्यप्र
त्यक्षासंभवात् नाभ्यन्तरमपि मनसा परात्मप्रत्यक्षा
संभवात् नाप्यनुमानं ईश्वरनिरूपितव्याप्तेरप्रसि
द्धेः न च द्यावाभूमी जनयन्देव एको विश्वस्य कर्तानुमा

न्या० चं०
त० टी०
३३

वनस्य गोप्त्रेत्यादिवेदः प्रमाणमिति ईश्वरोक्तत्वाद्वेवतस्य
प्रामाण्यसंभवेनेश्वराभावे तस्याप्यप्रामाण्यादित्याहुः नं
दसत् यत्र कार्यत्वं तत्र कर्तृजन्यत्वमिति व्याप्तेः प्रसिद्धत्वेनां
कुरादिकं कार्यं कर्तृजन्यं कार्यत्वात् घटवदित्यनुमाने
न कर्तृजन्यत्वे साधनीये तत्कर्तृत्वेनेश्वरसिद्धेः नच वि
नाकर्त्तारं धरणीसलिलसंयोगादिभिरेवांकुरादीना
मुत्पत्तिरिति वाच्यं घटादीनामपि तथात्वापत्तेः तदुक्तं
जगतां यदि नो कर्त्ता कुलालेन विना घटः चित्रकारं वि
ना चित्रं स्वत एव भवेत्तदेति नच स्वेदजादीनामिवांकुरा

दीनामपि तथात्वेकात्तत्तिरितिवाच्यं तेषामपिपदतावच्छेद
काक्रांतत्वात् नियंतुरभावेविपरीतोदयापत्तिःएवंजलधर
पटलेनकालेवृष्ट्यनुत्पादापत्तिःसचेतनमंतरेणाचेतनस्य
नियतकालेगमनागमनासंभवात् तस्माज्जगत्कर्त्ता।
कल्पनावश्यकः सएवास्माकमीश्वरः एवं पतनाभावव
द्गुरुत्वाश्रयः पतनप्रतिबंधकप्रयत्नयुक्तो धृतिमत्वा
दित्याद्यनुमानस्य प्रामाण्यमप्यूह्यं एवमीश्वरमुपासीत
यस्यज्ञानमयंतप इत्यादिश्रुतिभ्योप्यनुसंधेयाः कृतित्वंकृ
तिमत्वंयत्नूपादानगोचरापरोक्षज्ञानचिकीर्षाकृ

सिं॰ चं॰
त॰ टी॰
३४
35

त्तिमत्त्वं कर्त्तृत्वमिति तन्न गौरवात् केचित्तु कार्य्यमात्रं प्रति
जीवेश्वरयोर्न कर्त्तृत्वेन कारणत्वं अनेककृतिषु कारणता
वच्छेदकत्वे गौरवात् किन्त्वात्मत्वेनैव सतीश्वरसाधार
णात्मत्वं जातिरपि सिध्यति एतेन सुखादिसमवायिका
रणतावच्छेदकतया नेश्वरसाधारणात्मसिध्यतीति प
ना ४ त्तौ दरणोपि नदत्तिः अथ कथमीश्वरसाधकानुमान
मिति चेदंकुरादिकं आत्मजन्यं कार्य्यत्वात् घटवदितीति
विभावयामासुः मीमांसकास्तु कर्म्मैवेश्वरो मंत्रमयी देवता
स्वर्गादिकमेव पुरुषार्थः अर्थवादवेदो न प्रमाणमिति ग

देति मीमांसकैकदेशिनस्तु कर्मातिरिक्त एवेश्वर इति समूचिरे इतीश्वर
वादः नन्वीश्वरः किं शरीरी उतनतू हितः नाद्यः तच्छरीरस्य महत्
त्वे औदंबरफलादौ मशकविशेषोत्पत्तिर्न स्यात् नचतस्य प्र
वेशासंभवत्मध्यमपरिमाणत्वेऽनित्यत्वप्रसंगात् देशांतरे
कार्यानुत्पत्तिप्रसंगाच्च अणुत्वे दूषणादरी हृप्यते एवनां
त्यः शरीराभावे कर्तृत्वस्यैवासंभवादिति चेन्न शरीरवत
एव कर्तृत्वे मानाभावात् शरीरमंतरेणैवेश्वरेण संज्ञादि
वत्कार्योत्पादनात् ईश्वरस्य परमाणव एव शरीरमिति
केचित् आकाशशरीरं ब्रह्मेति श्रुतेराकाशमेवतदि ।

शि० चं०
त० टी०
३५

त्वपरे अन्येतु संसारिणाम दृष्टवशात् ईश्वरस्य शरीरमि-
तिब्रुवंति परेतु भूतावेशन्यायेनेश्वरस्य शरीरमिति मेनि-
रे अत्राहुः ईशः शरीररहित एव परंतु तत्त्वज्ञानसाध्यपा-
रमपुरुषार्थपदप्रणालिका मूलीभूतोपासनादिभिः
संसारपंकनिमग्नान्जनोद्दिधीर्षु लीलाविग्रहं दधा-
ति सच शिवशक्तिगणेशार्कविष्णूनां ब्रह्मणश्च तदु-
क्तं शिवशक्तिगणेशार्कविष्णुरूपान्महेश्वरः उपासना-
नुसारेण भक्तेभ्यो भुक्तिमुक्तिदः इति अत्रैवसर्वाः शिवा-
दीनां नेश्वरत्वे शिवस्तु विष्णोरुपासकः नामसत्वात्रो-

पास्यश्च शक्तिस्तु तदीयामाया ब्रह्मादयस्तु तदाज्ञानुवर्त्तिनः योल
ते क्ष्मीनिवासः तत्साम्यं कुतः शिवस्य श्मशानवासिनः कुतस्तरां शक्त्या
दीनाम् किंच विष्णुव्यतिरिक्तानामुपासनैव निषिद्धा तदुक्तं वा
सुदेवं परित्यज्य योन्यदेवमुपासते तृषितो जाह्नवीतीरे कूपं खनन्
ति दुर्मतिरित्याहुः अत्रोच्यते श्रीमच्छिवस्य कटाक्षलेशमा
त्रमाश्रित्य महापदवीं प्राप्तवतां विष्ण्वादीनामीश्वरत्वं कुतः वि
ष्णुस्तु शिवोपासकः अतएव स्वनेत्रमर्पयित्वा चक्रं बुण्डरी
कोदक्ष इतिनाम लब्धवानाराधनांतरेण लक्ष्मीं वैकुंठं च अतएवा
घापि रामेणापूजितो रामनाथः सेतौ प्रत्यक्षसिद्धः नचतन्हिकथं

विष्णुचरणोदकं बिभर्ति हर इति तच्च भक्तिपराधीनत्वात् अत एवेश्वरः परमे
श्वरस्तत्पदमेव व्यवह्रियते शक्तिरेषैव मायायाः शुद्धस्फटिकसंकाशः सू
र्यचंद्राग्निलोचनः लीलानाटकसूत्रधारः क्वचिद्घोररूपः क्वचित्सौ
म्यरूपः क्वचिच्छ्मशानवासी क्वचिदनेकदेवगणसमाश्रितानुपमकैला
शशिवलोकादिवासीत्यस्य शिवस्य साम्यं कुतो विष्ण्वादीनाम् तदु
क्तं शुद्धस्फटिकसंकाशं सर्वव्यापिनमीश्वरं कल्पे जगदाधारं विष्णुब्रह्मा
दिसेवितमिति शिवस्यामलस्य इति यदुक्तं तत्तुच्छं रुद्रावतारस्याभिन्नत्वात्
श्मशानवासित्वेन नैकृष्ट्यं दर्शितं तदपिनस्यातेत्यत्वात् तदुक्तं अनंतरूप
स्य शिवस्य लीलया विहारशीलस्य विचित्रकर्मणः अनेकरूपेणाचभी
त. बलेन तत्स्वरूपहानिर्न भवेत्कदाचनेति सुखं वा कुतस्तस्य दुःखं कुतो वा कु
तः स्वतंत्रत्वं कुतोऽस्वतंत्रत्वम् अनेकैः स्वरूपैरनेकैः प्रकारैः सदा लीलया खे
लतश्चिन्मयस्येति च किंच शिवातिरिक्तदेवतानामस्मामैवनिषिद्धा महादेवे

परित्यज्य य उपास्तेऽन्यदैवतं स मूढो विषमश्नाति सुधां त्यक्त्वा सुधान्
र इति गायंति अत्र प्रामाणिकाः किं भो ययाः शास्त्राद्ब्रह्मविष्णुमहेशा
निर्मिताः यत्कृपामवलंब्य सृष्ट्यादि रचयंति तत्सामर्थ्यमपि शास्त्रं
तिनार्हंति ते त्रयो देवाः कुतो वा तदधीनत्वं तस्याः परदेवताया निगदितु
मज्ञानत इति समूचिरे एवं गौणायेत्यादयस्तु तदोल्लंघ्य वर्णायामा
स्तुः अत्र स्मार्ताः पौराणिकाश्च ये एतेषां भेदवादिनां मोक्षः कथं भ
वेत् तदुक्तं शिवस्य हृदये विष्णुर्विष्णोश्च हृदये शिवः ईषदप्यंतरं कृत्वा
रौरवं नरकं व्रजेत् इति एवमत्र वेदो व्याह स ब्रह्मा स शिवः स हरिः
सेंद्रः सोऽक्षरः परमः स्वराडिति तदुक्तं श्रीधरस्वामिभिः माधवो
माधवावीशौ सर्वसिद्धिविधायिनौ वंदे परस्परात्मानौ परस्पर ट४

नतिप्रियाविति तदुक्तं मयापुराणो वैष्णवा युक्तासांगाश्च वेदाः स्मृत।
यः समस्ताः शास्त्राणि सर्वाणि विलोकितानि न क्वापि दृष्टः शि
व विष्णुभेदः श्रुतौ स्मृतौ शास्त्रपुराणमध्ये केनापि दृष्टः शिव वि।
ष्णुभेदः अघोततयोरेवमुखानवीनं सर्वैरपि श्रूयते एव वादः शिव।
स्य विष्णोपरि उक्तिरेषा पुरातनी श्रूयत एव सर्वैः यः स्वावयोर्भेदबुद्धि
यं करोति नरः स घोरं नरकं प्रयाति इति तत्त्ते देवता शक्ता वेत्ते तद्देवता
मुख्य कर्तृक सृष्ट्यादि प्रदर्शनं तु कल्पभेद इति अभिप्रायकं ग्रन्थता
व शान्तपादीनां सपिताम्यामभेदः तदुक्तं प्रोवाः शक्ता स्वर्गेण शाः
मौरा विष्णुप्रपूजकाः विद्विषंति मिथो मोहात्तेषां भक्तिश्च निष्फला
सिद्धान्ता बहवः प्रोक्ताः श्रुत्या नानाप्रयोजनैः परं तेषामभिप्राय।
जानाति विरलः कृती अनेककार्य सिद्ध्यर्थं रूपं बहुविधं विभोः

तत्कार्यज्ञानतो लोके सत्त्वात्बंधं प्रतिपत्तमिति ध्यानविशेषः यदि विशेषेमा।
क्तिमिहती स्यात्तदा विष्णुरपि शिवत्वेनैव क्षेपः हरौ भक्तिर्बहुलत्वादि स्या
जेर त्तदाहरित्वेन मोच्छिवं अतः कूपमंडूकन्यायेन लोकाज्ञानमूल्या सू
भवंतीति जगदुः इतीश्वरवादः जीवं निरूपयति जीव इति तन्नेत्यनुभ
संवध्यते ५ ज्ञ्यते बंधमोक्षयोग्यो जीवः जन्यज्ञानाधिकरणं वा अयमेवले नज्ञइ
त्युच्यते प्रतिशरीरं भिन्न इति सुखदुःखादिवैचित्र्यादिति हेतुः स्मरणा। मेक्षव ६
यः जीवस्याणुत्वे सर्वशरीरव्यापि सुखाद्यनुपलब्धिप्रसंगः मध्य
मयरमाणत्वेऽनित्यत्वापत्त्या कृतहान्यकृताभ्यागमप्रसंग इत्यभिप्रा अभिप्रायश्चेद्वेति
यवानाह विभुरिति विभुत्वान्नित्यत्वमपीष्टापत्तमित्याह नित्य। विशेषः ४
प्स्वेति ननु जीवसद्भावे किं मानमिति चेन्न अहं सुखी दुःखीति मान
स प्रत्यक्षस्य मानत्वात् न चात्मा नाव न प्रत्यक्ष इति भाष्यविरोधा।

विवदंते २ वाचकत्वात् १ कथितं २

इतिवाच्यंतस्यपरात्मपरत्वात् श्रतिपादितंचैवंब्रात्मतत्वविवेके। मे
ननुविप्रतिपन्नंप्रतिकथंप्रत्यक्षमुपन्यस्तंतुप्राक्रममितिचेत्तत्रा
नुमानमेवमानं बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्या।
श्रिताः तदनाश्रितत्वेसति गुणत्वात् योयदनाश्रितोगुणःसत
दतिरिक्तद्रव्याश्रितः यथा पृथिव्याद्यनाश्रितःशब्द इति सामान्य।
स्तिग्राह ६ मुखव्याप्तिकानुमानेन नवमंद्रव्यमात्मा सिध्यति नचतेमूर्त्तानां। बुद्ध्यादयः ६
गुणाभवंत्विति वक्तव्यं तथासति तेषामाभ्यंतरप्रत्यक्षानुपपत्ते।
मूर्त्तगुणानांरूपादीनां बाह्यप्रत्यक्षस्यैवानुभवसिद्धत्वात् अत
जन्यज्ञानविषय २ एवभूतत्वंबहिरिंद्रियग्राह्यविशेषगुणवत्वमितिसंगच्छते।
विशेषगुणत्वादेव नदिक्कालमनसां गुणाः ननुविशेषगु।

सखत्वादौ व्यभिचारवारणाय गुणत्वमिति २

गा त्वएव मानं न लभामहे इति चेत् बुद्ध्यादयो विशेषगुणाः एकेंद्रियग्राह्यत्वे
सति गुणत्वात् रूपवदित्यनुमानं मानं हि योगादिवारणाय सत्यंतं
नच गुणत्वएव किं मानमिति वाच्यम् बुद्ध्यादयः गुणाः अनित्य
त्वे सत्येकेंद्रियग्राह्यजातीयत्वाद्रूपवदित्यनुमानस्यैव मा
नत्वात् अणुकादावनेकांतिकत्ववारणाय जातीयेति [illegible]
आत्मादिवारणाय सत्यंतं [illegible]
[illegible] एवमिंद्रियं सकर्तृकं करणत्वात् कुठा
रवदित्यनुमानेनाप्यात्मा सिध्यति अत्र षडपि नास्तिकाः
क्रमशः प्राकृतेस्मत्तत्त्वादौ शून्यवादिनो माध्यमिकाः सु

सुषुप्त्यवहितोन्नरद्दाणोउत्थितस्य सुषुप्तावहं नाहमित्यनु

भवाच्छून्यमेवात्मा अतएव सर्वमिदं मिथ्येव तथा श्रुतिर

सुष्टेऽवं ३ प्याह असदेवेदमग्रआसीदित्याहुः तदसत् सुषुप्तावहं

नाहमित्यनुभवस्याप्रामाणिकत्वात् प्रामाणिकत्वे

त्वात्मनितस्य ज्ञानाभाववत्त्वात् यन्मिथ्येदमुक्तं तेद हेदस्य ६

पिन सत्यत्वं ततोनुभूयमानपदार्थजातस्याशक्यापला

पकत्वात् उपदर्शितवेदस्य गतिर्वक्ष्यते क्षणिकविज्ञा

नवादिनो योगाचार्य्यास्तु क्षणिकविज्ञानमेवात्मा तत्

द्विविधं प्रवृत्तिविज्ञानमालयविज्ञानं च तत्राद्यं घटादि

न्यादिप्रवृत्तिविज्ञाने सुषुप्तावहमित्यालयविज्ञाने सुखादिकमस्यैव ।
विकारः तदतिरिक्तवस्तुन एवाभावसिद्धेः श्रुतिरपि अन्योन्तर आत्मा वि
ज्ञानमय इति विज्ञानस्यैवात्मत्वमाहेत्याहुस्तदसत् पूर्वानुभूतपदा
र्थस्मरणानुपपत्तेः अनुभवितुरिदानीमभावात् अन्यानुभूते चार्थे
न्यस्य स्मृत्ययोगात् ननु कस्तूरीसुरभिपटवत्पूर्वपूर्वविज्ञानोत्पा
दितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वमिष्यामइति माभा संक्रान्तत्वं ६
षिष्ठाः तथा सति त्वत्पित्रानुभूतपदार्थस्य गर्भस्थेन त्वया स्मर
न्य णापत्तेरित्याद्यत्र विस्तरः सौत्रान्तिकास्तु ज्ञानाकारानुमेयक्ष
णिकबाह्यार्थ एवात्मेतीच्छंति वैभाषिकास्तु क्षणभंगुरवादिनस्त
क्षणिकबाह्यार्थ एवात्मेतीच्छंति तदुभयमपि मंदं घटादीनां तथात्वे ।

मानाभावात् एते चत्वारो नास्तिका बौद्धा इत्युच्यंते। बौद्धानामष्टादशभे
दाः प्रसिद्धाः उपभेदास्तु बहवः ते च विस्तरभयेन नोक्ताः चार्वाका
स्तु ब्राह्मणोहं गौरोहं स्थूलोहं जानामीत्यादिसामान्याधिकरण्य
प्रतीतेः ब्राह्मणत्वादिधर्मवति शरीर एव ज्ञानसुखाद्याश्रयत्व।
सिध्यतीति शरीरमेवात्मा तथा च श्रुतिः स वा एष पुरुषोन्नरसमा।
यइति ननु शरीरस्य पार्थिवत्वेन घटादिवज्जडत्वात्कथं ज्ञानाश्र
यत्वमिति मामंस्थाः केवलनागवल्लीदलस्य रागानुत्पादकत्वे।
पि नागवल्लीदलखदिरचूर्णक्रमुकसमुदायात्मकताम्बूलस्य रागो
त्पादकत्ववत्केवलपार्थिवस्याचेतन[illegible]त्वेपि भूतचतुष्टयसमुदाया
त्मकपार्थिवस्य ज्ञानाश्रयत्वे बाधकाभावादित्याहुः तन्न मृतश।
रीरेपि ज्ञानापत्तेः ननु ज्ञानं प्रति प्राणस्यापि कारणत्वेन तदानीं तदभा

आलोकप्रतिज्ञानस्याहेतुत्वे १

वान्न तदुत्पत्तिरिति चेद्यथा नैयायिकानां नये आत्मनो विभुत्वेन मूर्त्तश ।
रीरैर्नानापत्तिकारणं गीर्वाणगुरूणामप्यशक्यमिति चेन्न ।
हृद्दिनापूर्वः ३ अवयवोपचयापचयैः शरीरस्य नानात्वेन पूर्ववत्तद्दूषणा ।
वतारात् पुनः श्रूयतां विरुद्धत्वनृपत्वमूर्खत्वदरिद्रत्वादिनियाम
मकं भवेत्तः किं ब्रुवते संसारस्य स्वभाव एवायमिति चेत्तर्हि परीत्ये ।
किं बाधकं अस्तु जन्मसमय एवेति चेत्तर्हि तस्मिन्नेव समये जन्मा
न समयान्तर इत्यत्रैव नियामकं वद न चास्त्वीश्वर एव भवन्मते तत्र धर्माधर्मौ ८
नियामक इति वक्तुं शक्यं तस्य समदृष्टितत्त्वात् तस्माददृष्टमेव
नियामकमिति वाच्यं तच्चाश्रयमात्मानमन्तरेणानुपपन्नमिति ।
शरीरातिरिक्त एवात्मास्तु चेद्यः चार्वाकैकदेशिनस्तु काणोऽहं ।
धि, व[धि]रोऽहमहं जानामीति सामानाधिकरण्यदर्शनादिन्द्रियगुणा

बधिरेन्द्रियमित्यर्थः

सिं० चं०
त० टी०
४१

एवात्मेति वदंति तच्च बालस्थूलयितं चक्षुरादिनाशे योहं घटमद्रा
क्षं सोहमिदानीं स्पृशामीत्यभेदप्रतीत्यनुपपत्तेः अपरे तु चा
स्वप्ने२ र्वाकाः सुषुप्तिदशायां चक्षुरादीनामसु पर्मपि मनसः सर्वव्य
वहारदर्शनात्तस्य नित्यत्वाच्च तदेवात्मेति मन्यंते अन्ये तु आ
त्मा मनोमय इति मन्यंते तदप्यदर्शनादरागाद्य मनसोणुत्वेन
सुखाद्यनुपलंभप्रसंगात् इतरे चार्वाकाः प्राणेन विनाव्यव
अप्रमत्ता६ हाराद्दर्शनादन्योंतरात्मा प्राणमय इति श्रुतेश्च प्राण एवा
त्मेति कल्पयंति तदपि न युक्तं तस्यानित्यत्वेन तदुत्तरस्यु
पदर्शितत्रूषणावाणापहारपातमात्र पुत्रे पुष्टे नष्टेहमेव
पुष्टो नष्ट इत्याद्यनुभवादात्मा वै जायते पुत्र इति श्रुतेश्च स्वा
मन्यते महत्त्वस्य कारणत्वादिति भावः ५

पुत्र एवात्मा इत्यपि केचित् तदपि न तादृशानुभवस्याभिमानिकत्वात्।
उपदर्शितश्रुतीनामात्मनो ज्ञानाधिकरणत्वप्रतिपादनात् सत्यं।
ज्ञानमिति दृश्यमानस्फूर्तिबाध्यत्वात्सर्वपदेतात्पर्यं दिगंबरा।
स्तु देहातिरिक्तो देहपरिमाणकश्चात्मा स च दीपवत्प्रभावत्संकोचा
विकाशशालीत्याहुः तदप्यकिंचित्करं तस्यानित्यत्वापत्यात तत्स्वि दिगंबर ५
रहि पूर्वोक्तदोषवज्रप्रहारपातनात् अतएव क्षपणकाजैना।
इत्युच्यते इति संक्षेपः इति नास्तिकमतखंडनं अथ सांख्यशास्त्र
न्ताः आत्ममूलप्रकृतिमहदहंकारचतन्मात्रषोडशविकार
भेदात् पंचविंशतितत्त्वानि तत्रशीकर निर्लिप्ततामरस[illegible]पत्रला
शवत्कर्तृत्वभोक्तृत्वादिनिर्लिप्त आत्मा चेतनश्च मूलप्रकृति।

॥ वाक् ॥ पाद ॥ हस्त ॥ पायु ॥ लिंग ॥ ५

स्तु जगत्कर्त्री नित्या जडा च महत्त्वं च प्रकृतेः परिणामः प्रकृतिका । तात्त्विकसंबंधः
र्य्यमिति यावत् अहंकारस्तु अहं सुखी अहं दुःखीत्याद्यभिमा । वध्यादुग्धस्पद १ धि
नः अयं च महत्तत्त्वस्य कार्य्यं तन्मात्रं शब्दस्पर्शरूपरसगन्धाः
स्तेहंकारस्य कार्य्याणि महदादयः सप्तैते सप्त प्रकृतिविकृतयो कारणानिका ध्याणि ४।१
ऽपि विकारस्तु श्रोत्रादि पंच ज्ञानेन्द्रियाणि वागादि पंच कर्मेन्द्रि
याणि मनः भूम्यादि पंच भूतानीति षोडश तैर्महाभूतैः शरी
रमुत्पाद्यते तत्संबंधवशात्प्रकृतिरेव सर्वं करोति तत्संसर्गवशा
दात्मनोहं करोमीत्यभिमानं जायते यथाहुः तदप्यसत् अहं
कर्त्ता भोक्ता जानामीति कर्तृत्वभोक्तृत्वचैतन्यादीनामात्मा

ज्ञान

श्रलं २

नाधिकरण्यप्रतीतेश्चेतनातिरिक्तप्रकृतिसद्भावे मानाभावा
त् जडायाः प्रकृतेः कर्त्तृत्वासम्भवाच्चेति कृतं पल्लवितेन इति त्रैपः ३
।। स्वकीयंरूपमन्यत्रदधातीत्युपाधिः२

॥ वह्निः साध्यस्य धूमस्य व्यापकः साधनवदयोगोलकनिष्ठाभेदप्रतियोगी च ॥

संघटयति ।

द्वैलक्षण्यं योजयति यत्र धूम इति उपाधिभेदमादायासंभव ।
वारणाय व्यापकत्वशरीरेऽत्यंतपदमाद्यं साधनभेद ।
मादाय साधनस्योपाधित्ववारणाय व्यापकत्वशरीरेऽव्य
त्यंतपदमावश्यकं द्वयेऽनुपाधिमुपसंहरति एवमिति उक्तरी
त्येत्यर्थः सोयमुपाधिस्त्रिविधः केवलसाध्यव्यापकः प ।
क्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्य ॥
व्यापकश्चेति तत्राद्यमुपदर्शितः एवंश्चोक्तं वैदिकी नी हिं ।
साऽधर्मजनिका हिंसात्वात् क्रतुबाह्यहिंसावदित्यत्र नि
षिद्धत्वमुपाधिः तस्य यत्राद्यमे साधनत्वे तत्र निषिद्धत्व
मिति साध्यव्यापकत्वात् यत्र हिंसात्वं तत्र निषिद्धत्वमिति ने ।

तिनिषिद्धमप्यधर्मसाधनाव्यापकः क्रतुहिंसायांनिषिद्धत्वाभा।
वात् नहिंस्यात्सर्वभूतानीतिवाक्यतः पशुनायजेतेत्यादिविशे।
षकाकस्यबलीयस्त्वात् अतएवहिंसात्वेनाधर्मसाधनत्व।
त्व प्रयोजकमपितुनिषिद्धमेवेत्यादिकमपिदूष्यं द्वितीयायथा
वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वमुपा
धिः तस्यचत्रप्रत्यक्षत्वतत्रोद्भूतरूपवत्त्वमितिनकेवलसाध्य
व्यापकत्वरूपेव्यभिचारात् किन्तुबहिर्द्रव्यत्वलक्षणपक्ष
धर्मस्तदवच्छिन्नप्रत्यक्षत्वयत्रतत्रोद्भूतरूपवत्त्वमितिपक्ष।
धर्मावच्छिन्नसाध्यव्यापकत्वमेवआत्मनिव्यभिचारवारणा
यबहिः पदंयत्रप्रत्यक्षस्पर्शाश्रयत्वंतत्रनोद्भूतरूपवत्त्वमि

तिसाधनाव्यापकत्वे च वायावुद्भूतरूपवत्त्वस्याविरहात् तृतीयो घ
घप्रागभावो विनाशी जन्यत्वादित्यत्र भावत्वमुपाधिः तस्य
यत्र विनाशित्वं तत्र भावत्वमिति न केवलसाध्यव्यापकत्वं
प्रागभावे भावत्वविरहात् किंतु जन्यत्वरूपसाधनावच्छि
न्न विनाशित्वं यत्र तत्र भावत्वमिति साधनावच्छिन्नसाध्य
व्यापकत्वमेवास्ति यत्र जन्यत्वं तत्र न भावत्वमिति सा॰ देप्रांतरस्थोमित्रापुत्रः
धनाव्यापकत्वं च ध्वंसे भावत्वविरहात् एवं स श्यामो मि
प३ त्रातनयत्वादित्यत्र शाकपाकजत्वमुपाधिः श्यामत्वस्य
नील घटेऽपि सत्त्वान्न केवलसाध्यव्यापकत्वं किंतु सा॰
धनावच्छिन्नसाध्यव्यापकत्वमेव श्रेष्ठमत्र शाकपा

कजन्यत्वविरहेणासाधनाव्यापकत्वं चेत्यादिकमपि द्रष्टव्यं अथ वह्नि
मान् धूमादित्यत्र महानसत्वाभावोप्युपाधिः स्यात्तस्य महान
सभिन्नत्वलक्षणपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति ।
चेन्न पक्षधर्मेत्यत्र पक्षदृष्टान्तोभयसाधारणधर्मस्यैव विवक्षि स्पद्रु ५
तत्वात् अथ तर्हि गतमुपाधिलक्षणमिदमिति चेन्न निरवच्छि
न्नसाध्यवत्पक्षदृष्टान्तोभयसाधारणधर्मसाधनान्यतरावच्छि
न्नसाध्यान्यतरव्यापकत्वे सति साधनाव्यापकत्वमुपाधि
रिति तस्य परिष्करणीयत्वात् इदं च लक्षणमाचार्याणा
मेवाभिहितं लक्षणं तैरनुग्रणात् तेभ्यो द्रष्टव्यं इत्युपाधिभेदः ।।
नन्वेतावतोपाधिरूपगतः किं तर्हि व्याप्यत्वासिद्धमतत्राह ।

कालस्य साधनकालस्यात्यये ऽभावे ऽपदिष्टः प्रयुक्तो हेतुः कालात्ययापदिष्टः उच्यते ३॥

श्रुतित्वं ६

सिं० चं०
तं० टी०
८९
89

वह्निमत्त्वमिति तत्र हेतुः सोपाधित्वादिति सत्प्रतिपक्षदर्शितहेतुर्बोद्ध^
व्याः सत्प्रतिपक्षनिरूपणम्॥ बाधितलक्षणमाह यस्येति यस्य का
लात्ययापदिष्टः स्पर्शनेन त्वगिन्द्रियेणेत्यर्थः एवं घटः लौकिकः
सत्त्वादित्यादिरपि बाधितः तत्रापि घट इति प्रत्यभिज्ञारू^
पप्रत्यक्षेण लौकिकत्वलक्षणसाध्याभावस्य परिच्छिन्नत्वा निश्चितत्वात् ५
अव्याप्त्यादिदोषयुक्तत्वं ६ दितिदुष्टलक्षणमपि हेत्वाभासानामिति लक्षणं प्रसक्तलक्षण^ श्रुतालस्यादिमत्त्वं ७
व्याप्यत्वासिद्धे न भवति यत्रासाधारणधर्मेणैवोपाधिः अ^
कपिलत्वं ८॥ व्याप्तिलक्षणं तु भागासिद्धे न भवति असम्भवस्तु लक्षणा^
स्वरूपासिद्धे न भवति सिद्धसाधनत्वाश्रयासिद्धे त भवति^
वत्ते। संदिग्धसाध्यं वा अप्रयत्वात् न व्याप्तस्तु तस्य दूषितत्वेन सि

॥ यो ऽसत्यो ऽयमिति सुज्जमेदादित्यादि २॥ एकप्रापकत्वं ३॥

त्यत्रे

॥ प्रतिबंधकीभूतत्वाशीघ्रजिज्ञासानिवृत्तौ अवश्यवक्तव्यत्वमवसरः २ ॥

हेत्वाभाससाधनं निग्रहस्थानांतरमेवेति वदंति ॥ इति सिद्धांतः सजातीय
परिच्छेदेनानुमानखंडं समाप्तम् ॥ अथावसरसंगतिमभिप्रेत्याऽ
नुमानानंतरमुपमानं निरूपयति उपमितीति उपमितेः कर
णमुपमानमित्यर्थः तच्च सादृश्यज्ञानं निर्दिशति अथेति ननूपमि
तिरेव केत्यत आह संज्ञेति संज्ञा च पदं संज्ञी चार्थस्तयोः संबंधो
वाच्यत्वं तत्प्रकारकं गवयो गवयपदवाच्य इति ज्ञानमुपमिति
रित्यर्थः उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशे
षः ननूपमितिकरणमुपमानमित्युक्तं किं तदित्यत आह
तत्करणमिति सादृश्यप्रकारकं ज्ञानमित्यर्थः उपमितिक
रणत्वेनेत्यस्य प्रतिपादयितुं प्रतिजानीते तथाहीति वाक्या

त्रिति ४

प्रतिज्ञां करोति १

॥तुल्यत्वबोधकंवाक्यमतिदेशः।

र्थस्मरणेगोसदृशंपशुंपश्यतीतिगोसदृशंपशुंपश्यन्नतिदेशवाक्यार्थंस्मर ।
तीत्यर्थः श्रुतगवयपदवाच्य इति श्रभिप्रेतगवयोगवयपदवा ॥समुदाय २
च्य इत्यर्थः तेनगवयान्तरेशक्तिग्रहाभावप्रसंगइतिदूषणंगोपरा
स्तंतथाचगोसादृश्यविशिष्टपिंडज्ञानंकरणं अतिदेशवा ।
क्यार्थस्मरणमवान्तरव्यापारः उपमितिः फलमितिसार ।
तत्त्वोपमानंत्रिविधंसादृश्यविशिष्टपिंडं असाधारण ।
धर्मविशिष्टपिंडज्ञानंवैधर्म्यविशिष्टपिंडज्ञानंचतत्राद्य ।
मुक्तमेवद्वितीयंयथाखड्गमृगः कीदृगितिपृष्टेनासिका ।
लसदेकशृंगोतिक्रांतगजाकृतिरितितज्ज्ञानमन्त्यः श्रृच्चा ।
कालान्तरेणादृशपिंडंपश्यन्नतिदेशवाक्यार्थंस्मरति ।

ज्ञान ६

प्रकाशः २

तदनंतरं खण्डः खण्डपदवाच्य इत्युपमितिरुत्पद्यते श्रूयन्नामिकाल
स्य च्छृगोमेवासाधारणधर्मः ततो वयवत्वाउक्तः कोहमिति पृष्टे। पदार्थवक्तौत्तैः २
नाग्ध्रो हिवत्समानष्टष्टो नहुस्वयूवशारीरश्चैत्याश्रोत रि।
ग तेकालेरीणतत्पिडदर्शनाहितधर्मविशिष्टपिंडज्ञानं ततो।
तिदेशवाक्यार्थस्मरणं ततउ क्रुउष्टपदवाच्य इत्युपमिति।
रूत्पद्यते इत्याहुः नन्वाप्तवाक्यजन्यत्वाच्छाब्दबोध एवास्त्व
तिचेन्न उपमिनोमीत्यनुव्यवसायस्यापलापप्रसंगाद्धि।
तिरमणीय इतिश्री० ततोप्यवशिष्टे दे उपमानखण्डं समाप्तं।
श्रवसरसंगतिमभिधेत्योपमानानन्तरं शब्दं निरूपयति आप्तेति शा
ब्द इति शाब्दप्रमाणमित्यर्थः भ्रांतविप्रलंभककोवाक्यस्य शाब्दप्र

सि॰ चं॰
न॰ टी॰
८१

91

माणत्ववारणायाप्तेति ननु कोयमाप्त इत्यत आह आप्तस्त्विति यथा
र्थवक्ता यथाभूतार्थाबाधितार्थोपदेष्टा ननु वाक्यं किमत आह वाक्य
मिति पदं लक्षयति शक्तमिति अस्मात्पदादयमर्थो बोद्धव्य इति
निरूपकतासंबंधेन शक्तिविशिष्टमित्यर्थः अथ शक्तिं निरू
प्यते ननु शक्तिरेव केत्यत आह अस्मादिति घटपदात् घटरूपो
र्थो बोद्धव्य इतीश्वरेच्छैव शक्तिरित्यर्थः अर्थस्मृत्यनुकूलपद
पदार्थसंबंधत्वं तल्लक्षणं सा च पदार्थांतरमिति मीमांसकाः तन्न
प्रमाणाभावात् आधुनिके नाम्न्यप्येकादशेहनि पिता नाम
कुर्यादितीश्वरेच्छास्त्येव नव्यास्तु आधुनिकसंकेतितडित्था
दिपदेष्वीश्वरेच्छाया अभावादिच्छैव शक्तिरिति मन्यंते शा

शक्तिः ७

क्तिग्रहस्तु वृद्धव्यवहाराद्भवति तथाहि उत्तमवृद्धेन घटमानयेति
वाक्ये प्रयुक्ते मध्यमवृद्धो घटमानयति तद्बालो व्युत्पित्सु
र्बालोन्वयव्यतिरेकाभ्यां घटमानय इति वाक्यजन्यत्वं मध्य
मवृत्तिज्ञाने निश्चिनोति ततो गामानय घटं नयेति वाक्या
संग्रहत्यागाभ्यां ५ न्तरं शृणोत्यावापोद्वापाभ्यां घटपदस्य घटत्वविशिष्टे श
क्तिः गोपदस्य गोत्वविशिष्टे इति तां गृह्णाति एवमसति वाध्य
के धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति
कचिदुपमानादपि तदुक्तं शक्तिग्रहं व्याकरणोपमानको
शाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदन्ति सा

सि० चं०
नं० टी०
९२

निध्यातः सिद्धपदस्य रूढत्वादिति एवमयमर्थो भवतीत्यत्र एव
पदस्य दीर्घसूक विशिष्टे एव संते सर्वसंस्थानां जायते एवं शा
तने मोदमानास्तिष्ठंतीत्येवाः केनशशालिन इति वा
क्यशेषाच्छक्तिरवधार्यते हस्ती घृणीतीत्यस्य गजो घृ
णीतीति विवरणे हस्तिपदस्य गजे शक्तिग्रहः विवरणाच
स्वसमानार्थगजोघृणीकपदान्तरेण तदर्थकथनमिदमेव
विवृतिरित्युच्यते इह विकचसरोरुहे भ्रमर इत्यादौ प्रसिद्धप
दसांनिध्याद्भ्रमरादेः शक्तिग्रहः शेषस्तु सम नव्यास्तु ग
वादिपदानां व्यक्तावेव शक्तिः न तु जातावपि गौरवादिति मे
निरे मीमांसकास्तु विशेषणत्वेन गोत्वादेरेव प्रथममुपस्थि

इत्यतः किं सिध्यति जातिविशिष्टव्यक्तौ शक्तिरितिग्रहः ॥ शक्तिग्रहात् २

~~विनाप्याक्षेपंगौ स्फुरतीत्यनेनव्यक्तिप्रतीतेः प्राभाकरास्तुगवादिशब्दानामानयनादि~~

~~कार्यान्वितेगवादौशक्तिः सर्वत्रकार्यवाक्यएवव्युत्पत्तेः भूतलेघटइत्यादिसिद्धवाक्ये~~

तत्वाद्गवादिपदानां गोत्वादावेवशक्तिः व्यक्तिलाभस्तुगोत्वमास्त्र

येविनानुपपन्नमित्याक्षेपादित्याहुः तदसत् विनाप्याक्षेपंगौ ।

स्फुरतीत्यनेनव्यक्तिप्रतीतेः प्राभाकरास्तुगवादिपदानामानय ।

नादिरूपकार्यान्वितेगवादौशक्तिः सर्वत्रकार्यवाक्यएवव्युत्पत्तेः ।

भूतलेघटइत्यादिसिद्धवाक्येतुनव्युत्पत्तिरित्याहुस्तदसत् इहको

यपुत्रोसकलमनोरथदायिनीकारुण्यकोवर्ततीतिसिद्धवाक्यपा

मराणामपिव्युत्पत्तिदर्शनात् ॥ चैत्रः पचतीत्यादावाख्यात ।

स्यकर्त्तरिशक्तिरितिवैयाकरणाः तन्नगौरवात् किंतुकृतावेव ।

तथाचगवादिशक्तिग्रहेगृहीतशक्तिगवादिशब्दस्तज्ज्ञानवा

करणपदजन्यपदार्थस्मरणमवांतरव्यापारः श्याकोद्बोधयोग्य ।

इत्यतः किं सिध्यति
जातिविशिष्टव्यक्तौ
शक्तिरितिग्रहः ॥
इतिसाध्यो ४

शक्तिग्रहात् ४

शक्तिग्रह ५

तासन्निधितात्पर्यज्ञानानि सहकारीणि शाब्दबोधः फलमिति सा
रम् ॥ इति शक्तिवादः ॥ पदं चतुर्विधं यौगिकं रूढं योगरूढं ।
यौगिकरूढं च अवयवशक्तिर्योगः अवयवमात्रशक्तिकं यौगि
कं यथा पाचकादिपदं समुदायशक्ती रूढिः समुदायमात्रश
क्तिकं रूढं यथा गोपदम् अवयवसमुदायोभयशक्तिकमेक । पंकापादानकजनिकर्तृत्वं पंकजत्वं ६
जातीयार्थप्रतिपादकं योगरूढम् यथा पंकजादिपदं अव ।
यवशक्त्या पंकजत्वेन रूपेण कमलमेव बोधयति समुदायश
क्त्या च कमलत्वेन रूपेण अत एव शक्तिरावश्यकी यौगिका ।
र्थरूढ्यर्थयोः स्वातन्त्र्येण बोधकं यौगिकरूढं यथोद्भिज्जा ।
दिपदं योगेन तरुगुल्मादिकं बोधयति रूढ्योद्भिज्जसचाद्ध ।

शक्तिलक्षणान्यतरात्मकसंबंधः १ शक्याश्रितिसा बोधः शक्यः

रेभ्यस्त्विः शक्तिरिव लक्षणापि पदस्य वृत्तिः अथ केयं लक्षणा श
क्यसंबंधो लक्षणा वर्त्तते च गंगायां घोष इत्यत्र गंगापद शक्य ।
प्रवाहसंबंधस्तीरे लक्षणाबीजं च तात्पर्यानुपपत्तिः अत ।
एव प्रवाहे घोषतात्पर्यानुपपत्तेस्तीरे लक्षणा सत्यतिता
त्यर्थं च वक्तुरिच्छा वक्ता चापि संधार्य पितातेन मौनादौ व्या
प्तिः प्रयुक्ता सा च लक्षणा त्रिविधा जहल्लक्षणा अजहल
ल्लक्षणा जहदजहल्लक्षणाभेदात् यत्रान्वितानवाच्यार्थस्तत्रा
घा यथा मंचाः क्रोशंति गंगायां घोष इत्यादौ यत्र वाच्यार्थ
स्याप्यन्वयस्तत्र द्वितीया यथा छत्रिणो यांतीत्यादौ अत्र ।
छत्रिणोंतादितरेषां च गामतेन्वयः यत्र वाच्यैकदेशबाधे ।

स्थापयिताप

अपिनाल्लक्ष्यार्थ परिग्रहः २

वाच्यार्थानां १ लक्ष्यार्थानां १

तथाचराजसंबंधीभिन्नइत्यर्थः २

तथाचद्वित्वविशिष्टोधवखदिरौछिंधीत्यर्थः ४

नैकदेशान्वयस्तत्रतृतीयायष्ठ्यास एवषष्ठोस्तीत्यादौ अत्रतद्देशकाल ॥
विशिष्टस्यबाधःतत्पुरुषेराजपुरुषइत्यत्रराजपदस्यराजसंबंधि ॥
निलक्षणाबहुव्रीहावपिलक्षणायथाचित्रगुरित्यत्रगोपदंगोस्वा चित्रभिन्न ३
मित्वलक्षकंचित्रपदंतात्पर्यग्राहकंद्वंद्वेधवखदिरौछिंधीत्यत्रध
वखदिरयोस्तद्धर्मप्रकारेणयाभासमानद्विवचनार्थद्वित्वेलक्षणा
कर्मधारयेतुनीलोत्पलमित्यादौ अभेदसंबंधेननीलपदार्थउत्प ॥
लपदार्थेप्रकारस्तत्रनलक्षणानिषादस्थपतिंयाजयेदित्यत्रापि ॥
कर्मधारयेनलक्षणावेदबोधितयाजनानुपपत्त्यायश्रोपपुत्र ॥ अभेदसंभवेन ४
वेदेतस्याधिकारकल्पनात् स्त्रीशूद्रौनाधीयेतामितिवेदस्यनि
षादातिरिक्तशूद्रपरत्वात् दध्याहारयेत्यत्रद्वितीयालोपस्या ॥
लेदधिपदस्यदधिकर्मत्वेलक्षणाघटंजानामीत्यादावाख्या

निषादस्य ३

तथाचघटविषयकज्ञानवानहमितिबोधः १

तथाचदधिषुद्धिकर्मत्वविशिष्टकत्वाख्यानानुकूलकृतिमान्स्त्वं १

तस्यात्मनिलक्षणाऽयोगच्छतीत्यादावाख्यातस्यागमनानुकू ।
लव्यापारेलक्षणा अजयतीत्यादौजयार्थकधातोः अक्षजे ।
पेलक्षणातु अस्मिंस्तु तात्पर्यग्राहकमितिसंक्षेपः गच्छगच्छसि
चेत्कान्तपन्थानः संतुते शिवाः ममापिजन्मतत्रैवभूयाद्यत्रग
तोभवानितिप्रियतत्वेस्मनानन्ममप्राणवियोगोभविष्यतीतिबो ।
धाद्व्रजनाख्यातेत्यनंतरमेवलक्षणालङ्कारिकाः तत्रलक्षणाया ।
तस्यांतत्भावात् अथाग्निर्माणवकइत्यत्रमाणवकेग्निसादृ ।
श्यबोधाङ्गेणानुभूत्यनंतरमेवेति मेवमस्याः तस्यालक्ष्यमा ।
णगुणसंबंधात्मकत्वेनलक्षणानतिरिक्तत्वात् ।। इतिलक्षणा
व्यवस्था ।। ननुवृत्तिग्रहएवपदशाब्दे त्तिदानेतदारोगोरस्मादितिका
कार्यादिपि शब्दायंतिरतआह आकांक्षेत्यादि अत्रचकारेण ।

तेजस्वत्वादि २

मेणिवृत्तेः ४

तथाचस्वद्वृत्तिगुणवत्वरूपलक्षणा २

शि० चं०
त० टी०
६५

तात्पर्यज्ञानं समुच्चीयते तथा चाकांक्षा योग्यता तात्पर्यज्ञा
नानि सन्निधिश्च शाब्दनिदानमित्यर्थः तेनाकांक्षा
दिविपर्ययेण शाब्दविपर्ययेपि नो हानिः आकांक्षां व्युत्पादय त्वतिः२
भ्रमेण२ ति पदस्येति घटादिलक्षणानामपदस्य पदान्तरं विभक्तिपदेत
रू५४ स्य व्यतिरेकोऽभावः तत्प्रयुक्तं तत्प्रयोज्यं अन्वयानुभावकत्वम्
शाब्दबोधानुपधायकत्वमाकांक्षेत्यर्थः एवं धातुपदाख्या
तपदयोः गामानयेत्यादौ सुबन्ततिङन्तयोः प्रद्रष्टव्यम्।।
योग्यतामाह अर्थेति पयसा सिंचतीत्यत्र पयसि सेचकरणत्व
स्याबाधितत्वात् योग्यता सन्निधिं व्युत्पादयति पदानामि
तू२ ति अविलम्बेन पदार्थोपस्थितिः सन्निधिः क्वचिदुच्चारणात्तदु पदार्थोपस्थितिः १

६५

उच्चारणमावेषि

पदोपस्थितिः३ तिर्दुस्थले ८॥

पवोर्गीतितात्पर्यं तेन मौनिस्फ्रोकाद्यौतदं भावेषि न शकापकक
लकावकाशः अत्रैव व्याकरणाः अविलंबेन पदोपस्थिति
नं संपद्यते तत्कारणीभूतपदानुभवजनितसंस्कारस्यापि
गात्तु वर्णानामाशुतरविनाशित्वेन पदस्य वा प्रसिद्धेः सतत
पदोपस्थितिः ५ रात्तदनुभवस्यापि यद्विस्फोटात्मकं पदं स्वीक्रियते तदा शवि नित्य ५
ष्टमेवास्माकं मतमित्याहुः तन्न मृष्यामहे तत्तद्वर्णानुभव
समूहात् ७ जनितसंस्कारसमूहादेव सहकारिवलात् खलेकपोतन्या
येन समूहालंबनात्मकपदस्मरणसामर्थ्ये स्फोटस्या
किंचित्करत्वात् ॥ इति स्फोटवादः ॥ सैन्धवमानयेत्यादौ
तात्पर्यज्ञानादेव कचिल्लवणस्य क्वचिदश्वस्य बोधात्

॥ वृद्धायुवानः शिशवः कपोताः खलेयथामी युगपत्पतंति तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवंति ॥८॥

॥शाब्दबोधापत्तेः ५ ॥अर्थं बुद्ध्वा वाक्यरचनाद् इति न्यायादिति भावः ३॥

तात्पर्यज्ञानस्य १

सि॰ चं॰
त॰ टी॰
९६

ऽस्यापि कारणत्वं संजाघटीति नानार्थानुरोधात्मकरणादिकं ।
तात्पर्यग्राहकं द्वारमित्यादौ पिधेहीत्यादिशाब्दज्ञानादेव शाब्दः
अतः शब्दाध्याहार एव युक्तः नतु विधानरूपार्थाध्याहारः प ।
साकांक्ष ४ दविशेषजन्यपदार्थोपस्थितेरेव शाब्दबीजत्वादितरथा घटः का ।
र्मत्वमानयनं कृतिरित्यादितोऽन्वयापत्तेरिति आकांक्षादिशून्य
शब्द ६ वाक्यस्याप्रमाणत्वं निषेधयति तथा चेति आकांक्षादिकं ।
शाब्दहेतुरित्युक्तेऽप्यर्थः अनाकांक्षाद्युदाहरणं दर्शयति गौ ।
रश्व इति वाक्यं विभजते वाक्यमिति ईश्वरोक्तत्वादिति वेदः ।
पुरुषप्रणीतः २ पौरुषेयः वाक्यजन्यत्वाद्भारतादित्यनुमानात्तत्सिद्धिः ननु ।
स्वर्थमाणकर्तृत्वमुपाधिः तस्य भारतादौ साध्यव्यापक ।

सर्वकर्तृत्वस्य १
माण

॥ वस्तुतस्त्वीर्ष्यपुत्ररूपतया जायते इत्यर्थान्न क्षतिः प्रामाण्यं ३॥ ॥ स्मर्यमाणकर्तृत्वस्य १

त्वात् वेदे साधनाध्यायकत्वाच्चेति मा भावि शिष्टाः वेदेपितृस्य सत्त्वात् अ
तो ब्रह्मा वेद वर्तेत्युदाहृतापि किं वेदं ति सर्वमेवेति अबाध्यवाक्यमेवमे॰
वेत्यर्थः तेनात्मा वै जायते पुत्र इति वेदस्याप्रामाण्येपि न क्षतिः स्मृतिपुरा नोक्तनियमः संगः ३
णेतिहासाचाराणां वेदमूलकत्वेन प्रामाण्ये तन्मूलवेदानामधुना
नुपलभ्यत्वेन शाखा काचिदुच्छिन्नैवेति कल्प्यते केचित्तु यत्र वेदमूल
कत्वं दृश्यते तस्यैव प्रामाण्यं अन्यथा स्वबुद्धिकल्पितवाक्यानाम
प्रामाण्यापत्तिः ४ पि तदापत्तिः न च यत्र ऋषिप्रणीतत्वं तत्र प्रामाण्यं बृहस्पतिप्रणी
तनास्तिकसूत्राणामपि तदापत्तेरिति जजल्पुः ॥ नन्वेवं तर्हि शाब्दप्रमा॰ प्रामाण्यापत्तेः २
कथितार मग्नी मृग्ये चिंता प्रमाविभाजकवाक्ये शाब्दस्याप्युद्दिष्टत्वेन तत्कुतो॰
न प्रदर्शितमित्यत आह वाक्यार्थेति शाब्दत्वं च शाब्दात्मनो प्रमीत्यनुभ॰

वच्छिन्नाजातिः शाब्दबोधक्रमोयथा चैत्रोग्रामंगच्छतीत्यत्रग्रा
मकर्मकगमनानुकूलवर्त्तमानकृतिमानितिशाब्दबोधः द्वि
तीयायाः कर्मत्वमर्थः धातोर्गमने अनुकूलत्वं चसंसर्गम॰
दयाभासते लटोवर्त्तमानत्वं आख्यातस्यकृतिः तत्संबंध हानिः४
संसर्गमर्यादयाभासते रथोगच्छतीत्यत्रगमनानुकूलव्या॰
पारवान्रथइतिशाब्दबोधः स्नात्वागच्छतीत्यत्रगमनप्रागभा
वकालीनस्नानकर्त्तागमनानुकूलवर्त्तमानकृतिमानितिशा
ब्दबोधः क्त्वाप्रत्ययस्यकर्त्तापूर्वकालीनत्वंचार्थः भोक्तुंगच्छ
तीत्यत्रभोजनप्रागभावकालीनभोजनविषयकेच्छावा॰
न्गच्छतीत्यर्थः चैत्रेणगम्यतेतेङ्ल इत्यत्र चैत्रवृत्तिकृति

विक्लित्तिरूपा ।। कर्मणि विहिताख्यातस्य २

जन्यपाकजन्यफलशालीतंडुल इति शाब्दबोधः हेतित्वं संसर्गावल
लंब्यजन्यत्वं च तथा धातोः पाकः जन्यत्वं च कर्मणः फलं धात्वने
भावस्थले ३ पदस्य शालित्वं क्वचित् आत्मनेपदार्थो न भासते च चैत्रेण सुप्यत इत्या
चैत्र ४ त्र हेतिकृतिजन्यः स्वाप इति बोधः चैत्रः पचतीत्यत्र वर्तमान
प्रागभावप्रतियोग्युत्पत्तिकपाकजनककृतिमांश्चैत्र इत्यर्थः ग्रामं
नयेत्यत्र गोकर्मकमदिच्छाविषयानयनानुकूलकृतिमांस्त्वमित्यर्थः
ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र हेतित्वं साध्यत्वं लवदनिष्टाज दुःख ४
नकेष्टसाधनं ज्योतिष्टोमनामयागः स्वर्गकाम इत्यर्थः एवमे
वं सर्वत्र प्रथमांतमुख्यविशेष्यकः शाब्दबोधो नैयायिकः वैयाकरणा
स्तु धात्वर्थमुख्यविशेष्यक एव शाब्दबोधः यथा चैत्रः पचति तंडु।

तंडुलमित्यत्र २

शि० चं०
त० टी०
९८

लानिष्टविलिङ्गित्यनकूलस्वैनकण्टकः पाक इति बोध इत्याहुः
सर्वत्रदुष्टाः संत्येवेत्यत्र क्रियायुक्तैवकारस्यात्यन्तायोगव्यव
च्छेदोर्थः शंखः पाण्डुर एवेत्यत्र विशेषणयुक्तैवकारस्यायोगव्य
वच्छेदोर्थः ॥ इति संक्षेपः ॥ इदमपि बोध्यम् लटो वर्तमान
त्वमर्थः लिटो तीतपरोक्षत्वं लुटो भविष्यानद्यतनत्वं लृटो
भविष्यत्वं लोटो वक्तृवांछाविषयत्वं लङो भूतानद्यतनत्वं विधि लि
ङः कृतिसाध्यत्वे सति बालवदनिष्टाजनकेष्टसाधनत्वं
आशीर्लिङो वक्तृवांछाविषयत्वं लङो भूतत्वं लृङो अ
तीतत्वं भविष्यत्वं चेति शाब्दक्रमनिदर्शनं शाब्दमपसंह

निषेध्यः २

९८

वाचक २

रतितत्करणमिति सोंऽशाहस्त्रिविधः विधिर्मंत्रार्थवादभेदात् त्र।
तत्राद्यो विध्यभिधायकप्रत्ययघटितवाक्यं स च प्रत्ययः लि।
ङ् लोट् तव्यकृत्यप्रत्ययरूपः भवति हि ज्योतिष्टोमेन स्वर्गका
मो यजेतेति वाक्यं तथात्र लिङ्‌वत्तादृशप्रत्ययः विध्यभिधा
वाच्यः यकोऽत्राभिधेयो विधिर्ज्ञेयः स च प्रयत्नजनकचिकीर्षाजन। विधिः ५
कज्ञानविषयः कृतिसाध्येष्टसाधनत्वमेव सः ज्ञानातीच्छेति
यत्नतइतिनियमात् ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिक।
काम्यस्थले अहरहः संध्यामुपासीत यावज्जीवमग्निहोत्रं जु
हुयादित्यादि नित्यस्थले नैमित्तकस्थले च चिकीर्षाद्वाराकृति

सि॰ चं॰
त॰ टी॰
५५

भागाभावा॥

विकसेष्टक्रनाराचहतमृगमांसं कलंजपदवाच्यः

साध्येष्टसाधनताज्ञानं प्रवृत्तिं प्रति कारणं नित्येपि संध्यावंदनादौ
प्रत्यवायपरिहारादिकमिष्टं कल्प्यते न कलंजं भक्षयेदित्यादौ ।
नञा विध्यर्थस्याभावो बोध्यते अत्र भागाकराः कार्यत्वं विध्य
र्थः प्रवृत्तिं प्रति कृतिसाध्यताज्ञानं बीजं तेन कृत्यसाध्ये न प्र
वृत्तिः ननु विषभक्षणादौ प्रवृत्तिप्रसंग इति चेन्न दनुपायिनः इ
ष्टसाधनताल्लिंगात् कृतिसाध्यतानुमितिरिष्टसाधनसाज्ञा
नकालीनकृतिसाध्यताज्ञानं वा काम्यस्थले प्रवर्तकमतो
नोक्तदोषः नित्यस्थले चाहमिदानींतनकृतिसाध्यसंध्या
वंदनकः ब्राह्मणत्वे सति विहितसंध्याकालीनशौचादि ।

मत्वादिति शौचादिमत्त्वशक्तिसंधानजन्यत्वकृतिसाध्य-
ताज्ञानमिति समाधत्ते अथानानुगम इति चेत्स्वविशेष-
णावत्ताशक्तिसंधानजन्यत्वमेव कृतिसाध्यताज्ञानेऽनुग-
तं स्वपुरुषः तत्र काम्यस्थले इष्टत्वं विशेषणं नित्यस्थले
च शौचादिकमेवेत्युद्बोधयतीति नैवं शोभनं अलघीयस्त्वा-
त् सोऽपि विधिस्त्रिविधा अपूर्वनियमसंख्यापरिभेदात् तत्र
केवलमप्राप्तौ विधिराद्यः यथा स्वर्गकामो यजेतेत्यादौ
अत्र यजनादेरप्राप्तत्वात् यत्रोभयोः प्राप्तावेको नियम्यते
तत्र द्वितीयः यथा व्रीहीनवहन्यादित्यादौ अत्र व्रीहीणां

नखविदलनमसुशल्लावहननंशास्त्रेमसुशल्लावहननमेवनियम्य
तेसर्वत्रप्राप्तस्यैकचिद्विधिस्तृतीयः यथापंचपंचनखाभक्ष्या
इत्यत्रसर्वेषांपंचनखानांभक्षणेप्राप्तेपंचैवपंचनखाभक्ष्या
इतिविधीयतेशशकःशल्लकीगोधाखड्गीकूर्मश्चपंचम
इतिपंचनखाज्ञेयाः॥इतिविधिविशेषः अर्थवादस्त्रिधा
गुणवादोनुवादोभूतार्थवादश्चेतितत्राद्योयथाआदि
त्योयूपोयजमानःप्रस्तरइतिप्रमाणान्तरेणनिर्णीतस्या
र्थस्यज्ञापकोनुवादः यथाग्निर्हिमस्यभेषजमितिश्चे
तत्कालेपितृऋणज्ञापकोभूतार्थवादः यथाजरायणा

मप्यवंशूर इत्यर्थवादः मंत्रस्त्वापः पुनंत्वित्यादि॥ इति मंत्रवा
दः॥ ननु शब्दो न प्रमाणांतरं संसर्गज्ञानं तु अनुमानादेव संप
नीपद्यते तथा हि गामानयेत्यादिपदानि स्मारितार्थसंस
र्गवंति आकांक्षादिमत्पदकदंबकत्वादाप्तवाक्यवदिति चेन्ना
नुमितिविलक्षणायाः शाब्दात्प्रत्येमीत्यनुभवसाक्षिकशाब्द
स्यापलपितुमशक्यत्वात् अथार्थापत्तिरपि प्रमाणां
तरमस्ति तथा हि पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे
श्रुते वा दिवाभुंजानस्य पीनत्वं रात्रिभोजनं विनानुप
पन्नमित्यनुपपत्तिधीर्भवति इयमेवार्थापत्तिः तेनो

यं देवदत्तो रात्रौ भुंक्ते इत्यनुभवो जायत इति मैवं मंस्थाः अयं दे-
वदत्तो रात्रौ भुंक्ते दिवाभुंजानत्वे सति पीनत्वादिति केवलव्य-
तिरेक्यनुमानेनैव तत्सिद्धौ तस्याः किंचित्करत्वात् अनुल-
ब्धेः प्रमाणत्वं निराकृतमेव प्राक् संभवोपि न प्रमाणांत-
रं तथाहि द्विविधः संभावनात्मको निर्णयात्मकश्चेति तत्रादि-
न प्रमाणं यथा ब्राह्मणेषु चतुर्दश विद्याभिस्तत्व संभव-
तीति चतुर्दश विद्याश्च ऋग्वेदश्च यजुर्वेदः सामवेदो ह्य-
थर्वणः शिक्षाकल्पो व्याकरणं छंदो ज्योतिनिरुक्तयः
मीमांसा तर्कशास्त्रं च पुराणं धर्मशास्त्रं के विद्याश्च-

तुर्दशैताः स्युः पुरुषार्थनिदानिकाइतिवेदांतस्यमीमांसायामंतर्भा
वः वैशेषिकस्यतर्के सांख्यपातंजलिपाशुपतवैस्नवरामायणा
भारतादीनांधर्मशास्त्रे पुराणं च ब्राह्मपाद्मस्कांदमार्कंडेयशै
ववैस्नवगाणेशसौरभागवताग्नेयभविष्यब्रह्मवैवर्त्तलैंगवामन
वाराहकौर्म्यमात्स्यगारुडब्रह्मांडभेदादष्टादशधावासिष्ठलैंगा
नारसिंहनंदीयनारदीयवामनीयमहेसन्वस्वसारदीयवाएशिवध
र्मकापिलमानववारुणरेणुकवायवीयमाहेश्वरपाराशरमा
रीचभार्गवादिभेदादुपपुराणिबहुविधानियाज्ञवल्क्यविस्नुयमा
गीरवसिष्ठदक्षसंवर्त्तशातातपपाराशरगोतमशंखलिखित

हारीतापस्तंबौशनसकात्यायनवात्स्यायनबृहस्पतिदेवलनारद
पैठीनसिप्रभृतिकृतानिधर्म्मशास्त्राणितस्माच्चतुर्दशैवनत्वा
युर्वेदधनुर्वेदगांधर्व्ववेदाख्याशास्त्रभेदादुपवेदचतुष्टयमप्यस्तिका ष्य३
मशास्त्रस्यायुर्वेदेंतर्भावः नीतिशास्त्रशिल्पशास्त्राश्वशास्त्र
गजशास्त्रसूपकारशास्त्रचतुष्षष्टिकलाशास्त्राणामर्थशा-
स्त्रेंतर्भावः तस्मादष्टादशैवविद्या इति चेत्स्यादेवमपिशतेपंचा
शदितिनिर्णयात्मकसंभवोनुमानेंतर्भूतः इहवटेयक्षास्तिष्ठती
त्यैतिह्यमपिनप्रमाणांतरं किंत्वज्ञातमूलवक्तृकः शब्दः चेष्टा
पिनप्रमाणानीति सिद्धं एतेनानुपलब्धिकादिप्रमात्रयप्य-

सिद्धा इति बोध्यं ॥ इति श्रीसिद्धान्तचन्द्रोदये तृतीयपरिच्छेदे शब्दखं-
डं समाप्तं ॥ ज्ञाननिष्ठं तद्वति तत्प्रकारकत्वात्मकं प्रामाण्यं स्वतो
ग्राह्यं परतो वेति विप्रतिपत्तिः । तत्र ज्ञानप्रामाण्यं च तदप्रामाण्या-
ग्राहक यावज्ज्ञानग्राहकसामग्रीग्राह्यमिदमेव स्वतो ग्राह्यमिति किं-
वदन्ती ग्रस्यार्थः ज्ञानप्रामाण्यं ज्ञाननिष्ठप्रामाण्याग्राहका या-
वती ज्ञानग्राहिकानुव्यवसायादिरूपसामग्री तद्ग्राह्यमिति ।
इदमेव च ज्ञप्तौ स्वतस्त्वमुच्यते यत्र गुंजापुंजेऽग्निरयमिति भ्रमः प-
श्चादिदं ज्ञानमप्रमेति ज्ञाने ततो द्वितीयज्ञानं प्रमेति भ्रमात्तत्र तृ-
तीयज्ञानग्राह्यत्वस्यानुव्यवसायगतप्रामाण्ये सत्वेपि तृतीय

ज्ञानस्य व्यवसायनिष्ठाप्रामाण्यग्राहकत्वेनाप्रामाण्यग्राहक
त्वाभावात् स्वतस्त्वं न संजाघटीति अतस्तद्वितिप्रामाण्याधारण
वत्तत्पदार्थः यत्रायं घट इति प्रमानंतरमिदं ज्ञानमप्रमेत्यप्रमा
तत्र धूलीपटलेऽपि धूम इति ज्ञानप्रकारत्वस्य धूलीपटलेऽ।
सत्त्ववत्त्वतो ग्राह्यत्वस्य प्रामाण्येऽसत्वान्नबाधः अतोऽप्रामा।
ण्यग्राहकेति सिद्धसाधनवारणाय यावदिति ननु अनुव्य
वसायेन कथं प्रामाण्यं गृह्यत इति चेत् घटमहं जानामीत्यनु
व्यवसायो घटं घटत्वं समवायं च विषयीकुर्वन्नात्मनि प्रकारी।
भूतं घटमात्मानं तत्संबंधिनं व्यवसायं च विषयीकरोति एवं

सतिपुरोवृत्तिकप्रकारसंबंधस्यैवप्रमापदार्थत्वेनस्वतएवप्रामाण्यं
गृन्हातीति मुरारिमिश्राः॥ अनुव्यवसायात्मकमेवसर्वज्ञानंतच्च।
स्वप्रकाशमितिमातृमानमेयविषयत्वात्त्रिपुटीत्युच्यतेप्रकाश स्वरु
सामर्थ्यादेवस्वात्मानमिवस्ववृत्तिप्रामाण्यंस्वतएवगृह्णातीति।
प्राभाकराः॥ अयंघटइतिज्ञानानंतरंघटेज्ञाततानामफलंभवति।
ततोज्ञातोघटइतितत्प्रत्यक्षंययाज्ञाततयाज्ञानमात्रस्यातींद्रियत्वा
त्‌ज्ञानंतल्लिंगंप्रामाण्यंचाहघटत्वप्रकारकज्ञातवान्‌घ।
ताव टत्वप्रकारकज्ञातत्वादित्यनुमीयतेतस्मात्स्वतएवप्रामाण्यं।
गृह्यतेस्वतोग्राह्यत्वंचज्ञानग्राहकातिरिक्तानपेक्षत्वमिति

सि० चं०
त० टी०
१०४
१०५

माहाः तन्नेति गौतमीयाः एषामयमाशयः इदं जलमिति ज्ञानानं
तरमनभ्यासदशायां ममोत्पन्नं ज्ञानं प्रमेति वेत्ति संदेहो न स्याद्धि।
नित तत्र पूर्वं प्रामाण्यस्य निश्चितत्वात् स्वप्रकाशत्वमपि दुर्वचं।
चाक्षुषादिना स्वस्यात्मनो विषयीकर्तुमशक्यत्वात् ज्ञानविषयता
तिरिक्तज्ञाततायां मानाभावात् अतो निषेधकोटिरेव वलीयसी
त्यलमतिकर्कशविचारभारधारणेन शिशूनां अथ कस्यचित्।
तः प्रामाण्यं गृह्यत इति चेदुच्यते प्रथमं जलं जलत्वयोर्निर्विका।
तमि ल्पकं तेनेदं जलमिति विशिष्टज्ञानं तेन तदिच्छा ततः प्रवृत्तिस्ततो जला।
ललाभस्ततदनन्तरं पूर्वोत्पन्नजलज्ञानं प्रमा समर्थप्रवृत्तिजनक
त्वात् यन्नैवं तन्नैवं यथाप्रमेति व्यतिरेकिणा यथा घटज्ञान १०४

सफलर

मितिः अन्वयदृष्टांतस्यापि संभवेनान्वयव्यतिरेकिणा वा प्रामाण्यं
निर्धार्य्यते इति स्पष्टो ग्रंथ स्वतस्त्वं प्रमाया जन्यत्वादुत्पत्तौ परतस्त्वं गु गुणा २
णास्य प्रमासाधारणकारणत्वात् यथा प्रत्यक्षे सन्निकर्षः अनुमितौ
विष्टपरामर्शः उपमितौ सादृश्यज्ञानं शाब्दे शाब्दज्ञानं एवमप्रामा
णयमपि परतो गृह्यते इदं च मीमांसकानामपि संमतं पुरोवर्ति
निप्राकाराभावस्यानुव्यवसायेनानुपस्थितत्वात् अप्रमायाः पि
तमेडूकवमां जनचाकचिक्यादूरत्वादिदोषजन्यत्वादुत्पत्तौ पर
तस्त्वं दोषस्याप्रमासाधारणकारणत्वादित्यास्तां विस्तरः ॥ प्रा
था २ इति प्रामाण्यवादः ॥ अयथार्थानुभवं विभजते अयथार्थेति संश

सि॰ चं॰
त॰ टी॰
१०५

यं लक्षयति एकस्मिन्निति एकस्मिन्धर्मिणि एकस्मिन्नेव पुरोवर्त्तिनि
पदार्थे विरुद्धा व्यधिकरणा ये नानाधर्माः स्थाणुत्वपुरुषत्वादय
स्तेषां वैशिष्ट्यं संबंधः तदवगाहि ज्ञानं संशय इत्यर्थः घटपटाविति
समूहालंबनज्ञानस्य पटत्वघटत्वरूपविरुद्धनानाधर्मवैशि
ष्ट्यावगाहित्वादतिप्रसंगवारणाय एकस्मिन्निति पटः पृथिवी
ति ज्ञानस्यैकस्मिन्धर्मिणि पटे पटत्वपृथिवीत्वरूपनानाधर्मवै
शिष्ट्यावगाहित्वादतिप्रसक्तिरतो विरुद्धेति पटत्वविरुद्धघटा
त्ववान् घट इति ज्ञाने ऽतिप्रसक्तिवारणाय नानेति उदाहरति यथे
ति स त्रिविधा साधारणधर्मधीजन्यो ऽसाधारणधर्मधी

जन्यो विमतिपत्तिजन्यश्च विशेषादर्शने कोटिद्वयस्मरणं संशयमा-
त्रे हेतुः तत्राद्य उपदर्शितः उच्चैस्तरत्वं तत्र साधारणधर्मः स्थाणु-
त्वनिष्ठव्याप्यवक्रकोटरादिमत्त्वपुरुषत्वनिष्ठव्याप्यकरादिमत्त्वं
वा विशेषः स्थाणुत्वपुरुषत्वे च कोटिद्वयं द्वितीयो यथा शब्दत्वे नि-
त्यानित्यव्यावृत्तत्वं शब्दमात्रवृत्तीति ज्ञाने शब्दो नित्यो न वेति न वेति
संशयः तृतीयो यथा प्रामाण्यं स्वतो ग्राह्यं परतो ग्राह्यं वेति
संशयः विपर्ययं लक्षयति मिथ्येति तर्कं लक्षयति व्याप्य
तिस्तत्र वह्न्यभावो व्याप्यः धूमाभावो व्यापकः उदाहरति यथा
येति यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथग्विभागो नु

(सहकारित्वात्)

चितः तथापि प्रामाण्यानुग्राहकत्वात्तदुचितमिति बोध्यम् ।
स्वप्नस्तु पुरीतद्बहिर्देशयोः संयोगे मनसि निद्राख्येऽदृष्टविशे
षेण धातुप्रकोपेण वा जन्यते स च विपर्ययएव ॥ इति श्री ॥०॥
तृतीयपरिच्छेदे यथार्थानुभवं वर्णयित्वा स्मृतिं विभजते स्मृतिरपीति प्रमा
जन्येति स्वजन्यसंस्कारसंबंधेन प्रमायाः स्मृतिकारणत्वमिति ।
भावः अप्रमाजन्येति इदं रजतमित्यप्रमातो रजतत्वेनप्युक्तेः स्म
रणमयथार्थं ॥ इति बुद्धिनिरूपणम् ॥ सुखं निरूपयति सर्वेषा
मिति सर्वात्मनानुकूलमिति वेद्यपरत्वं सुखमित्यर्थः इष्टत्वमनु
कूलत्वं अहं सुखीत्यनुभवसुखत्वजातिमद्धर्ममात्रसाधा

रणाकारणगुणो वा सुखं तच्चतुर्विधं वैषयिकाभिमानिकमा
नोरथिकाभ्यासिकभेदात् विषयसाक्षात्कारजं प्रथमं राज्याधि
पत्यकोडित्यगार्वादिजं द्वितीयं विषयध्यानजं तृतीयं सूर्यनम
स्कारोपायादिजन्यं तुरीयं दुःखमाह प्रतिकूलेति प्रतिकूलत्वं द्वि
ष्टत्वं दुःखत्वं जातिमद् धर्मसाधारणाकारणगुणो वा दुःखं
इदमपि पूर्ववच्चतुर्विधम्॥ इच्छां निरूपयति इच्छेति कामइतिप
र्यायः इच्छात्ववती इच्छा सा द्विधा फलेच्छा उपायेच्छा च फलं सु
खादिकं उपायो यागादिः द्वेषं निरूपयति क्रोध इति द्वेष्मीत्या
नुभवविद्धद्वेषत्वजातिमान् द्विष्टसाधनताज्ञानजन्यगुणो

क्रि० चं०
न० टी०
१०७

वोद्वेषः प्रयत्नं निरूपयति कृतिरिति प्रयत्नत्वजातिमान् प्रयत्नः ।
स त्रिविधः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् इच्छाजन्यो गुणः प्र
वृत्तिः द्वेषजन्यो गुणो निवृत्तिः जीवनादृष्टजन्यो गुणो जीवन
योनिः स च प्राणसंचारकारणं धर्ममाह विहितेति वेदविहि ।
तेत्यर्थः स च कर्मनाशाजलस्पर्शकीर्त्तनभोगतत्त्वज्ञानान्नश्य
ति अधर्ममाह निषिद्धेति वेदेनेति यावत् एष च भोगप्रायश्चित्तज्ञा
नादिना नश्यति एतावेवादृष्टमिति कथ्येते वासनाजन्यो चतत्व ।
ज्ञावेव चैत्रस्य प्राशीरादिकं चैत्रविशेषगुणजन्यं कार्यत्वे सति चैत्र
स्वभोगहेतुत्वात् चैत्रप्रयत्नजन्यकुसुमवर्ण्यकादिवदित्यनुमाने

मानेनलाघवमनुसृत्यबुद्ध्याद्यष्टगुणानामिदानींयुगपदाश्रयमा
हबुद्ध्यादयइतिअत्रमात्रपदमवधारणार्थं संस्कारं विभजतेस
स्कारेतिसामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्व
व्याप्यजातिमान्संस्कारः द्वितीयपतनासमवायिकारणं
वेगः सद्विधाकर्मजोवेगजश्चतत्राद्योनोदनोत्पादकेक
र्मजन्यःप्रारीरादौप्रसिद्धः वेगवत्कपालजन्यघटेद्वितीयः
तस्यकपालवेगजन्यत्वात् आश्रयमाह वेगइति भावनाल
क्षयतिअनुभवेति आत्मादिवारणायप्रथमदलं अत्रानुभ
वउपेक्षात्मिकोबोध्यः इदंतुबोध्यं उद्बुद्धसंस्कारएवस्मृतु

अनुभवध्वंसवारणायद्वितीयदलं २ नोट

सि० चं० न० टी० १०८

पधायकः उद्बोधकं च चिंतादिकं तदुक्तं सदृशादृष्टचिंताद्याः स्मृ
तिबीजस्य बोधका इति अत्र नव्याः संस्कारं प्रति स्मरणमपि का
रणं स्थितिस्थापकमाहात्म्यश्चेति पृथिवीमात्रे समवेतसमवेत
संस्कारत्वव्याप्यजातिमत्त्वं तत्त्वे आश्रयमाह कटादीति आदि
नाकार्मुकादेः परिग्रहः॥ अथ गुणानां साधर्म्यवैधर्म्यमक्रिया
द्रव्यकर्मभिन्नत्वे सति सामान्यवान्गुण इति गदितमेव शाकूरूपा
दिचतुष्टयसांसिद्धिकद्रवत्वस्नेहादिदशभावनानां विशेषगुणत्वं
तच्च पृथिवीसमवेतसमवेतद्वीं द्विपराद्यसांसिद्धिकद्रवत्वभावना
न्यत्वविशिष्टगुणत्वापरजात्यनधिकरणत्वे सति गुरुत्वान्य
गुणत्वं संख्याद्यष्टनैमित्तिकद्रवत्वस्थितिस्थापकवेगानां सामा

अस्यार्थः पृथिवीसमवेताः संख्यादयः तत्समवेता हूी द्विपदाद्य सांसिद्धिकद्रवत्वविशिष्टा गुणत्वापरजातयः संख्यात्वादयः
...व्याप्तिवारणाय भावनान्यत्वेति॥ १ ॥

१०८

न्यगुणत्वं रूपादिचतुष्टयपरत्वापरत्वद्रवत्वस्नेहवेगानां मूर्त्त
ट वृत्तिगुणत्वं शब्दादिशभावनानामूर्त्तवृत्तिगुणत्वं संख्यादिच
चानां मूर्त्तामूर्त्तोभयवृत्तित्वं एकत्वभिन्नसंख्यैकपृथक्त्वभिन्ना।
पृथक्त्वसंयोगविभागानामनेकवृत्तिगुणत्वं तदन्येषां गुणाना
मेकैकवृत्तिगुणत्वं रूपादिचतुष्टयशब्दानां वा सैकैकेंद्रियग्रा
ह्यगुणत्वं संख्यादिसप्तद्रवत्वस्नेहवेगानां द्वीन्द्रियग्राह्यगुण
त्वं बुद्ध्यादिषट्कस्यातींद्रियग्राह्यगुणत्वं गुरुत्वधर्माधर्मस्थिति
स्थापकभावनानामतींद्रियगुणत्वं अपाकप्रभवरूपादिचतुष्टय
मध्यमपरिमाणैकपृथक्त्वगुरुत्वसांसिद्धिकद्रवत्वस्नेहवेगास्थि।

त्तिस्थापकानां कारणगुणपूर्वकत्वं जन्यद्रव्यावृत्तिविशेषगुणा
नामकारणपूर्वकत्वं संयोगविभागवेगानां कर्मासमवायिकारण
त्वं कारणगुणासमवायिकारणत्वं च संयोगविभागशब्दादृष्ट
भावनानामव्याप्यवृत्तिगुणत्वं बुद्धीच्छाप्रयत्नद्वेषभावनानाम
विषयत्वं गंधसंयोगादिचतुष्टयसुखदुःखद्वेषधर्माधर्मसंस्का
राणामनित्यगुणत्वं तदितरगुणानां नित्यगुणत्वं वैधर्म्यं पूर्वव
द्बोध्यम्॥६॥ इति श्रीसिद्धांतचंद्रोदये गुणविशेषनिरूपणंना
मतृतीयः परिच्छेदः॥३॥ क्रमप्राप्तकर्मणः स्वरूपमाह चा
लनेति तल्लक्षणमुद्दीरितमेव प्रागुत्क्षेपणं लक्षयति ऊर्ध्वेति
ऊर्ध्वदेशस्य हस्तेन यः संयोगस्तस्यासमवायिकारणमित्यर्थः एवं

मध्येपि ननु भ्रमणरेचनस्पंदनतिर्य्यग्गमनज्वलनादीनामतिरिक्तत्वे कुतः
पंचत्वमत आह गमनात्सर्व्वमिति ॥ इति॰ कर्म्मविशेषनि॰ चतुर्थः ४ सामा-
न्यं विभजते निरूपयति नित्यमिति आश्रयमाह द्रव्येति परसामान्य-
माह परमिति अपरं तदाह अपरमिति ॥ इति॰ पंचमः परिच्छेदः ५ ॥
विशेषं निरूपयति व्यावर्त्तका इति स्वतः इत्यर्थः ॥ इति॰ षष्ठः परिच्छे-
दः ६ ॥ समवायं निरूपयति नित्य इति स्थानमाह अयुतसिद्धेति ननु अ-
युतसिद्धपदेन किं ग्राह्यं तत्राह ययोरिति उक्तं च तावेवायुतसिद्धौ -
द्वौ विज्ञातव्यौ ययोर्द्वयोः अनश्यदेकमपराश्रितमेवावतिष्ठत इ-
ति कपालघटयोर्मध्ये एको घटोऽविनश्यन्नपरं कपालमाश्रित

सि० चं०
नं० टी०
११०

ना

एवावतिष्ठतस्तावयुतसिद्धावित्यर्थः विनश्यदवस्थस्याप्यर्थोऽस्थितत्वेनायुत
सिद्धत्वेन स्यादत उक्तं अविनश्यदिति उदाहरति अवयवेति इति श्री० समवा
यनिरूपणं सप्तमः ॥७॥ प्रागभावं लक्षयति अनादिरिति घटादिवारं
णाय प्रयत्नदलं परमाणुवारणाय द्वितीयदलं ननु प्रागभावः कस्मिं
न्काले स्थीयत आह उत्पत्तेरिति कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगिसमवा प्रागभाव ५
यिकारणे वर्त्तत इत्यर्थः अथ प्रागभावः कथं सिद्ध इति चेत् सत्यामपि
सामग्र्यामुत्पन्नस्य पुनरुत्पत्तिप्रसङ्गः ध्वंसेन तत्सिद्धिः इह कपाले घटो भ
सयेन ७
विष्यतीति प्रतीतिरपि मानं ॥ इति प्रागभावनिरूपणं ॥ ध्वंसं लक्षय
ति सादिरिति उत्पत्तीति कार्यस्योत्पत्त्यनंतरं स्वप्रतियोगिसमवा ध्वंस २
यिकारणे इति इत्यर्थः स च ध्वस्त इति प्रत्ययविषयः अत्यंताभावं द

॥ वर्तमानप्रागभावप्रतियोगिघटः ४

११०

रीयत्वं त्रैकालिकेति त्रैकालिकत्वं सति संसर्गावच्छिन्नप्रतियोगि-
ताकोऽत्यंताभावः ध्वंसप्रागभाववारणाय त्रैकालिकेति भेदवारणा-
य संसर्गेत्यादि उदाहरति स द्विविधः एकपर्याप्तधर्म्मावच्छिन्नप्रति-
योगिताकः उभयपर्याप्तधर्मावच्छिन्नप्रतियोगिताकश्च तत्राद्यो ध-
र्मो घटत्वादिः द्वितीय उभयत्वादिः अयमेव व्यासज्यवृत्तिधर्म इत्यु-
पद च्यते सामयिकाभावो नांगीक्रियते घटवति भूतले घटाभावप्रत्यय-
त्वेपि सामयिकाभावानंगीकृतोत्यभावः सा च सामग्री भूतलघटसंयोग
प्रा ँगभावध्वंसान्यतरत्वात् दृष्टप्रतीतिकालीनभूतलादिकं च-
प्रतियोगितावच्छेदकैक्येपि एकप्रतियोगिकाभावानां तेषां संसर्गभे-

सि० चं०
न० टी०
२११

देनबहुत्वविशेषाभावसमुदायात्सामान्याभावोतिरिक्त एव अनवस्था
साध्यत्वेनद्वितीयाभावोभावस्वरूप एवेति संप्रदायविदः भावस्य ।
निषेधमुखप्रमाणगम्यत्वांशभेवेन तृतीयाभावः प्रथमाभाव ।
स्वरूप इति नवीनाः इत्यास्तां विस्तरः ॥ अन्योन्याभावलक्षणं ।
तितादात्म्येति इति सिद्धांतचंद्रोदयेऽभावविशेषनिरूपणंना
माष्टमः परिच्छेदः ८ ॥ अथ प्रमाणप्रमेयसंशयप्रयोजनेति ।
न्यायस्य प्रथमसूत्रे षोडशपदार्थानां प्रतिपादितत्वात्कथं ।
सप्तत्वमत आह नैषामिति तथा च तेषां सप्तस्वान्तर्भावो वयो ।
गतत्वेनापि विभाग इत्याकारकेपि प्रतिपादितत्वात्केषांमंतर्भा द्वितिभावः ।

२११

वइतिचेन्निशामयप्रमाणस्यद्रव्यगुणयोरंतर्भावःआत्माशरीरेंद्रियाऽ
र्थैत्यादिप्रमेयरूत्वेतत्राद्यानांत्रयाणांद्रव्येवाचबुद्ध्यादिविषयरूपाऽ
हिंदचार्थानांगुणेआत्मनोद्रव्येधर्माधर्मात्मकप्रवृत्तेर्गुणेरागद्वेष
मोहात्मनोहृदोषस्यगुणेप्रेत्यभावोमरणोत्तरंजन्ममरणंचरमश
शीरप्राणसंयोगध्वंसःआद्यशरीरप्राणसंयोगोजन्मसुखदुःऽ
खसंवेदनात्मकेफलस्यगुणेदुःखस्यगुणेअपवर्गस्याभावेसच
दुःखध्वंसरूपःसंशयस्यगुणेसाध्यतेयाकामनाविषयप्रयोज
नस्यपर्यायशब्दव्याद्यैमहानसादिदृष्टांतस्यप्रामाणिकत्वेनाऽ
म्युपगतार्थैसिद्धांतस्यचपर्यायशब्दव्याद्यैप्रतिज्ञाद्यवयवस्याऽ

शि० चं०
त० टी०
११२
112

तर्कस्य च निर्णयस्य च तत्वबुभुत्सुकथा स्वरूपवादस्य विजिगीषुक-
थारूपजल्पस्य च स्वपक्षस्थापनहीना कथा या वितंडा वादश्च-
तुर्णां हेत्वाभासानां यथोचितं दूष्यादावंतर्भावः अभिप्रायांतरेण
प्रयुक्तस्यार्थांतरं परिकल्प्य दूषणाभिधानं छलं तस्य गुणे
असदुत्तरं जातिस्तस्या अपि शत्रुपराजयहेतुर्निग्रहस्थानं तेष्व प्रति-
ज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोध इत्यादिकं बहुविधं यथायथं
द्रव्यादाविति ननु मणिसत्वे दाहानुत्पादनात्वह्नावनित्याशक्ति-
रतिरिक्तैवेति चेत्तेजकाभावविशिष्टमण्यभावस्यापि दाहका-
रणत्वेन तत्स्यैव मानाभावात् नापि सा हश्यपदार्थांतरं तच्च

तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं शुद्धिरपि नातिरिक्ता किंतु
भस्मादिसंयोगसमानकालीनास्पृश्यस्पर्शप्रतियोगिकयाव-
दभावसहितभस्मादिसंयोगध्वंस इति संक्षेपः ॥ इति श्रीसिद्धां-
तचंद्रोदयेतिरिक्तपदार्थखंडनं नाम नवमः परिच्छेदः ॥ ९ ॥
पदार्थज्ञानस्य परमप्रयोजनं मोक्ष इत्यामनंति स च स्वर्गादि-
रिति मीमांसकाः नित्यसुखाभिव्यक्तिरिति तदेकदेशिनः अहं-
कारनिवृत्तावेदाहीन्यमिति सांख्ययत्ताः ब्रह्मात्मशाकजीवस्या-
विद्याप्रभवमिथ्याज्ञाननिवृत्तौ स्वस्वरूपताधिगाम इति वेदां- ति २
नः सारूप्यसालोक्यसामीप्यसायुज्यभेदाच्चतुर्विध इति

सि० चं०
त० टी०
१२३

सगुणोपासकाः अपराधीनत्वेति चार्वाकाः ऊर्ध्वगतिरित्यपि केचित् ।
तत्सर्वं धीमतां चिंत्यं अपितु आत्यंतिकैकविंशतिदुःखध्वंसः आ ।
त्यंतिकत्वं च स्वसमानाधिकरणदुःखप्रागभावासमानकाली
नत्वं दुःखानि चैकविंशतिः शरीरं षडिंद्रियाणि षड्विषयाः षट् ।
बुद्धयः सुखं दुःखं चेति दुःखानुषंगित्वात् शरीरादौ गौणं दुःखत्वं ।
तथा चात्मा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रु
तेरात्मज्ञानसाधननिदिध्यासितसाधनमननसाधनत्वपदा
र्थमात्रे जाघटीति एवं च सति तत्त्वज्ञाने शरीरपुत्रादावात्मस्वीय ।
त्वाभिमानरूपमिथ्याज्ञानस्य नाशः तेन दोषाभावस्तेन प्रवृत्त्य

ॐ श्रीगणेशाय नमः ॥ धराधरसुताधरं धृतधराधिवाहस्तु तं धरामृतविभावित
स्मरनिवारितानीदृशं सुरासुरविमंथितामृतसहोदरालंकृतं स्मरामि सुरवंदितं नाहता ५२
सारिच्छिरोगंडकम् ॥ १ ॥ दुर्वारमत्तद्विरदेंद्रसंततेः पंचाननं पंचमुखस्य लो
चने शिष्ये महः संततसेविताघ्रिकं सौरं नमः प्रीतिकरं भजाम्यहम् ॥ २ ॥
शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्व
मिंद्रियत्वम् अस्ति च शब्देतरोद्भूतविशेषगुणा ये रूपादयस्तदनाश्रय
त्वे सति ज्ञानकारणीभूतो मनःसंयोगस्त्वगादिमनःसंयोगस्तदाश्र
यत्वं चक्षुरादाविति लक्षणसमन्वयः अत्रात्मन्यतिव्याप्तिवारणाय
सत्यंतं श्रोत्रेऽव्याप्तिवारणाय इतरांतं चक्षुरादावव्याप्तिवारणाय उद्भूते
ति उद्भूतत्वस्य न जातित्वं शुक्लत्वादिना संकरात् न च शुक्लत्वव्याप्यानु
द्भूतत्वानीति वाच्यम् तेन रूपेण चाक्षुषादिजनकत्वानुपपत्तेः

इदानीं विशेषपदकृत्यं कंठे भूमिकामाह उद्भूतत्वस्येति ६

परंतु शुक्लत्वादिव्याप्यानुद्भूतत्वनानात्वतदभावकूटवदुद्भूतत्वं तस्य सं१
योगादिसाधारण्यात् तद्व्याप्यासंभववारणाय विशेषेति वस्तुतस्तु१
उद्भूतत्वं गुणत्वसाक्षाद्व्याप्यजातिरेव न चोक्तदोषापत्तिः प्रमाणा१ संकर ३
भावेनानुद्भूतरूपानंगीकारात् ननु रूपादिसमवायिकारणताव
च्छेदकपृथिवीत्वादिमत्त्वात् घ्राणादेर्नीरूपत्वापत्तेर्वा तत्र रूपादि
स्वीकारश्चावश्यक इति चेन्न तादृशनियमस्याजनितावयविक
पालादौ स्नेहसमवायिकारणतावच्छेदकावच्छिन्ने च जलपर१
माणावादौ व्यभिचारित्वात् घ्राणादेर्नीरूपादेरिष्टत्वाच्च नचा१
दृष्टपूर्वदहने २ तप्तघृतादौ दृष्टपूर्वदहनोत्पत्तेस्तत्र रूपस्यावश्यकत्वात् तस्यापा१
कजत्वेनावयवरूपं विनानुपपन्नमिति तदवयवेष्वपि रूपमुररी१ तदितिशेषः १

परमाणौ जन्यस्नेहाभावादिति भावः ३

तदभावः स्वनिष्ठभूतत्वमिति तन्न तत्रोक्तं संगच्छते तथा च नत्तमादायासंभ-
वइति विशेषपदं व्यर्थमेव एवं द्वित्रेषु न कोऽप्युद्भूतविशेषइति गुणपद-
मपि तथैवेति मैवं विभावनीयम् तदाश्रयत्वमात्रोक्तौ स्पार्शसंभवतो नेति
स्वनाश्रयत्वमित्याश्रयाभिन्नत्व न तु तदत्यन्ताभावकत्वं अतो न द्व्यणुका-
द्विमत्त्वमादाय चक्षुरादावव्याप्तिः अथानाश्रयत्वशब्देनाश्रयभि-
न्नस्याश्रयत्वात्यन्ताभावस्य वा कथं लाभ इति चेदिदं शब्देतरोद्भूतविशे-
षगुणाश्रयशब्देन तद्गुणाश्रयताबोधनेतादृशगुणपदोत्तरन-
ञा विग्रहे कृते तत्रोद्भूतः प्रत्ययतेतस्य निपातार्थत्वादन्यस्मिन्नभेदेना-
न्वयः तदुत्तरत्वप्रत्ययेन तत्त्वमिति न च नञः तादृशार्थान्वयेन नञो मध्य
निवेशोऽसंभवः समस्तपदपूर्वनिपातस्यैव नञः साधुत्वादिति वाच्यं
समस्तं वधिकार्थक पदघटितपदसमुदायातिरिक्तस्थले एव तथा नियमा-

करणीभूतस्य चोद्भूतत्वे घ्राणेन निर्विशेषावयवाद्यवच्छेदेनाघ्रातस्यानु
द्भूतरूपसिद्धिरिति वाच्यं घ्राणेऽवयवेष्वनुद्भूतरूपादिना घ्राणा
दिष्वुद्भूतरूपापत्तिभिया अनुद्भूतरूपादिवादिनाप्युद्भूतरूपा
दिकं तस्मान्नोत्पद्यते इति वा घ्राणकरणीभूतया च द्रव्यपदहनो
द्भूतरूपानुरोधेन तदवयवेषूद्भूतरूपकल्पनात् अनध्यक्षत्वं
नभस्माच्छादितवह्निवत्तदुत्पत्तेः तत्त्वकश्चित्साक्षात्प्रयोजकं क्ष
चित्वरं परमाण्वादावुपादौ च स्वविशिष्टरूपत्वादिना अथ च रूपत्वा
दिकं वा स्वात्मत्रेण प्रयोजकं एवं च रूपत्वादिवदुद्भूतत्वस्यापि संयो अविशुद्धेनानुद्भूते
गादौ बाधकाभावः अत एव उद्भूतत्वं प्रत्यक्षप्रयोजकीभूतो धर्मः

इं० वा०
॥ ३ ॥

नैरर्थक्यापत्तेः केचित्तु भस्मनः पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपा
देयत्वं सिद्ध्यति यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति नियमेः अत्र दृष्टा
न्तः स्थूलपटध्वंसजन्यसूक्ष्मपटः एवं च भस्मनो गंधवत्त्वेन पृथिवीत्वसिद्धौ
तदवयवानां पृथिवीत्वं तत्समवायिकारणकद्रव्यत्वेन पाषाणे पृथिवीत्वसि
द्धिमाहुः तदसत् उक्तव्याप्तौ कथंचित् प्रथमद्रव्यपदस्य प्रयोजनसम्भवेपि द्विती
यद्रव्यपदस्य व्यर्थत्वात् यत्तु दण्डप्रागभावध्वंसजन्ये घटे व्यभिचारात् नवीना
मते प्राचां मते मिथ्याज्ञानध्वंसजन्ये कायव्यूहे व्यभिचाराच्च तद्वारकत्वेन
सार्थक्यं सम्भवतीति तन्मंदं मणिध्वंसजन्ये दहनादौ व्यभिचारवारणाय ध्वंस
त्वेन जनकस्यावश्यं विवक्षणीयत्वात् दण्डप्रागभावध्वंसात्मके दण्डस्या
ध्वंसत्वावच्छिन्नजनकत्वाभावेनाव्यभिचारात् कायव्यूहस्य मिथ्याज्ञानध्वं
सजन्यस्यैवासिद्धत्वात् न च नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि
इति वचनात् कर्मणां भोगं विना नाशाभावबोधनेन तत्त्वज्ञानानंत

मिथ्याज्ञानध्वंसाद्दोषनाशो भवति कायव्यूहस्तु योगबलेनैवेति भावः २

गीकारात् इहतु स संबंधिकार्थबोधकाश्रय [illegible] पदघटितत्वात्
अत्र मध्यनिवेशस्यापितस्य संभवात् अन्यथाघटानधिकरणसाध्याभावव
दृत्तित्वमित्यत्रापितस्य मध्यनिवेशो न स्यात् इति अथ पाषाणादौ पृथि
वीत्वेन गंधानुमानात् तत्र त्वगंधस्योद्भूतत्वे प्रत्यक्षतापत्त्याऽनुद्भूत
तगंधसिद्धिः न च तत्र पृथिवीत्वहेतुः स्वरूपासिद्ध इति वाच्यं का
ठिन्यादिना तत्सिद्धेः यत्तु भस्मजनकत्वेन पाषाणादौ पृथिवीत्व
सिद्धिरिति तत्तुच्छम् ध्वंसप्रतियोगिनोरेकत्र जनकत्वासम्भवात्
न च प्रतियोगिनो व्यापारावच्छिन्नकारणत्वं अस्य व्यापारानव
च्छिन्नकारणत्वं न विरुद्धमिति वाच्यम् तथा सत्यनुभवध्वंसेने
वोद्बोधकसमवधानवशेन स्मरणापत्तौ संस्कारकल्पनाया

न्या० वा०
४
भोगजनकीभूतं कर्म प्रारब्धकर्मेति तथा च शङ्कते कायव्यूहधारणस्य जन्मान्त-
रत्वेन तत्र भोगजनकीभूतकर्मणस्तत्त्वज्ञाननाश्यत्वेन तज्जन्यभोगस्यासंभवा-
दू२ त्तदर्थं कायव्यूहस्य तत्त्वज्ञानानन्तरमसंभवात् किंच कायव्यूहस्य भोगार्थत्वे-
करणीयतया तज्जन्यभोगस्य सुखादिसाक्षात्काररूपस्य मनसा सुखादिसंबंधे
विनाऽसंभावितया शरीरावच्छेदेनाणुरूपमनःसंबंधासंभवेन कदाचित्तस्य
व्यूहा सुखाद्युपलब्ध्यनुपपत्तेः क्रमेण साक्षात्कारांगीकारेणैव तदुपपत्तेः कृतम-
धिकेनेति संक्षेपः न चैतावतैवेष्टसिद्धिः संभवतीति वाच्यम् लोकाभिहत-
पाषाणजन्यत्वेन पाषाणध्वंसजन्यत्वाभावान्न व्यभिचार इति वाच्यम् यतो वा
णासंयोगध्वंसस्यैवेत्यत्र विनिगमनाविरहेण उभयहेतुतासिद्धेः तुल्ययु- ३९
क्त्या भस्मनोपि पाषाणसंयोगध्वंसेन चरितार्थे तत्रापि पाषाणध्वंसस्य हे-
तुतानापत्तेश्चेति चेत् समंजसं तथा पुत्रपौत्रजन्यघ्राणादौ तथा गंधाभावेन तत्-
स्य घ्राणान्यत्वेन पृथिवीत्वे तत्र गंधसाधकमिति नानुभूतगंधसिद्धिः गु
४

रंमिथ्याज्ञाननाशेपुण्यपापनाशेविनाभोक्तृत्वानुपपत्त्यामिथ्याज्ञा
ननाशान्नभोगमात्रघ्नोभुक्तकायव्यूहोजन्यतएवेतिवाच्यम्भिद्य
तेहृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाःक्षीयन्तेचास्यकर्माणितस्मि
न्दृष्टेपरावरेइतिद्वितीयमुण्डकश्रुत्याज्ञानाग्निःसर्वकर्माणि
भस्मसात्कुरुतेऽर्जुनइतिभगवद्वचनानुरोधेनचज्ञानानंतरं
प्रारब्धकर्मणांभोगनाश्यत्वेतदितरकर्मणांज्ञाननाश्यत्वा
वक्तव्यम्एतज्जन्मनि [illegible]
[illegible]
[illegible]
[illegible]

दिति चेन्न चर्मणोः शरीरावयवत्वेन तन्नाशे शरीरनाशापत्त्या स्पर्शादेश्च ।
र्मणिः स्मरणानन्तरं तदिदं शरीरमिति प्रत्यभिज्ञानुत्पत्त्या तस्य नाशाद्वि ।
कारेण च चर्मणोऽवयवत्वास्वीकारात् न चैकं चुकनाशानन्तरं तच्छरी ।
रस्य नाशेऽपि प्रत्यभिज्ञायाः साजात्यावलंबकत्वात् तस्यावयवत्वेऽपि
ष्टमेवेति वाच्यम् तथा सति तुल्ययुक्त्या नासादीनामपि तदवयवत्वाप
त्त्या तन्नाशेऽपि शरीरनाशापत्तेः प्रत्यभिज्ञानस्य साजात्यावलंबनस्य प्र
कृतेऽपि वक्तुं शक्यत्वात् किंच तस्यावयवत्वे त्वगिन्द्रियस्य सर्वावयवाव ।
च्छेदकत्वेन तत्स्वीकारात् न खकेशनखादीनां कृन्तनेऽपि दुःखापत्तेः अपि ।
च त्वचः शरीरावयवत्वे हस्तांगुल्यादिकमादाय विनिगमनाविरहः स ।
मवाच्चतस्माच्चर्मणोऽपि संयुक्तद्रव्यविशेषो न परं त्वंत्यावयवावेत्ययमप्यु । ग
पगंतव्यम् न चैतस्यांत्यावयवत्वे न्यूनाधिकभावो न स्यादिति वाच्यम् ।
शरीरवृद्ध्यादिवदवयवोपचयादिनोपपत्तेः एवं चात्रातिव्याप्तिर्दुरुद्धरै ।

णांतस्यैवतन्त्रत्वग्राहकत्वाल्लक्षणाकल्पनायाः पूर्वपदोत्तरपदयोस्तुल्यत्वात्
तदाश्रयत्वेनाभावस्य तु आश्रयत्वांशेनान्वयासहविग्रहकरणात् इति दिक्
न च तस्यत्वेनाभावत्वार्थकत्वेऽसंभव इति वाच्यम् अणुसंयोगस्य हेतुत्वनि।
यामकत्वेन नित्यैकालिकायोगाच्च मनसि श्रवणे च संयोगादिना।
कस्याप्यवृत्तित्वे तत्र लक्षणासंगतेः समवायेन चेद्विवक्षितं तदा घटा।
दावव्याप्तिः तस्यां त्वावयववृत्त्यनित्यव्याप्तेर्दुष्परिहरणीयत्वात् यदि चाश्र।
यत्वेन ज्ञानासमानाधिकरणं विवक्षितं तदा वक्ष्यमाणरीत्या चेत्सुषुप्ता।
हं शरीरगुणावत्सभाश्रयत्वेन तत्राव्याप्तेः सुषुप्तौ ज्ञानानुत्पत्त्यनुरोधेन च।
र्ममनःसंयोगस्य तत्कारणत्वांगीकारेण चर्मण्यतिव्याप्तेश्च ननु।
चर्मणः शरीरावयवत्वेन समवायेनैव तादृशोद्भूतविशेषगुणाश्रय।
शरीरवत्त्वसत्त्वात्तदवच्छिन्नप्रतियोगिताकाभावासत्त्वान्नातिव्याप्तिः।

दिप्रत्यक्षविषयत्वेन तस्य सिद्ध्यर्थं प्रमाणान्तरगवेषणायास्वैफल्यापत्तेः । अत ए-
व आत्मा तावन्न प्रत्यक्ष इति आत्मतत्त्वविवेचने व्याख्यातं परात्मपरतया मिश्रैः । के-
चित्तु सुषुप्तौ ज्ञानानुत्पत्त्यनुरोधेन त्वङ्मनःसंयोगस्य हेतुत्वं कल्प्यते इति वद-
न्ति तदपि न सम्यक् त्वङ्मनःसंयोगस्य ज्ञानसामान्यप्रतिकारणत्वेन समवा-
येन ज्ञानसामान्यं प्रति त्वगाश्रयेण त्वचा मनसो वा विजातीयहेतुत्वनियामकसंयो-
गेन हेतुतया गौरवापत्तेः चाक्षुषत्वाचादिसामग्रीमेलनदशायां चाक्षुषादिसा-
मग्र्याः सत्त्वाच्च प्रतिप्रतिबन्धकत्वकल्पनं च मन्मते विजातीयमनःसंयोगस्य समवा-
वायः कारणतावच्छेदकः संबन्धः कल्प्यते चाक्षुषादिसामग्रीकाले त्वङ्मनः-
संयोगाभावादेव न त्वाचापत्तिरिति न प्रतिबध्यप्रतिबन्धकभावकल्पने
चैतिलाघवमिति चेत्सत्यं सर्वांशे भ्रमात्मकस्वप्नं प्रति नाडीमनःसंयोगस्य
हेतुत्वात्तदाश्रयिण्यां नाड्यामिति व्याप्तिः न च स्वप्नस्य मानसविपर्ययरूप-
स्य तत्तादृग्दोषेण गतार्थत्वात् न नाडीमनःसंयोगस्य तत्कारणता अन्यथा भ्र-
ममात्रस्य दोषजन्यत्वासंभव इति वाच्यं तत्तद्दोषाणां तत्रासत्त्वात्तादृश

वेत्यस्यैव परिशीलितस्मृतेः अथैवमपि परमात्मनः परकीयत्वेन मानसप्रत्यक्षत्वा
रणायाशक्यत्वात् आत्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयात्ममनःसंयोगस्य
तद्धेतुत्वमावश्यकं तस्यैव ज्ञानसामान्यं प्रति हेतुत्वपरिकल्पनस्य सुष्ठुत्वे ज्ञानोत्पत्ति
वारणेन न च स्वमनःसंयोगस्य तद्धेतुत्वमिति न चात्मप्रत्यक्षत्वावच्छिन्नं प्रति परा
त्मव्यावृत्तविजातीयात्ममनःसंयोगस्य हेतुत्वे ईश्वरस्यापि परात्मत्वेन तेन सहा
स्मदादिमनःसंयोगस्य परात्मव्यावृत्तस्याभावेन तत्प्रत्यक्षत्वासंभावितत्वाद् ईश्वरस्य
प्रत्यक्षविषयत्वबोधकात्मा वारे द्रष्टव्यः मनसैवानुद्रष्टव्य इत्यादिश्रुतेरप्रामाण्या
पत्तिरिति वाच्यं तादृशवेदस्य जीवप्रत्यक्षपरत्वात् न चैवं जीवस्य सर्वदा प्रत्यक्षवि
षयत्वेन तस्य सर्वदा मुक्तिः स्यादिति वाच्यम् श्रवणादिप्रयोज्यपरैः कृतात्मत
त्त्वपरैः कृतात्मतत्त्वज्ञानस्यैव मोक्षहेतुत्वेन सर्वदा तादृशप्रत्यक्षाभावेन मोक्षा
पत्तेरभावात् वेदस्य दृशिधातोरप्येतादृशप्रत्यक्षवाचकत्वात् यत्तु आत्मा वारे
श्रोतव्य इत्यादिश्रुतौ आत्मपदं परमात्मपरमेवेति तन्न परमात्मनश्श्रव

नोत्पन्नप्रभायां चाक्षुषाभावात् अत एवैतन्मते लकारोद्धहिः परिहृष्यते अन्यथा॥
वक्तृषोगोलकान्तर्गतकृष्णताराग्रमात्रवृत्तित्वेन तत्रैव प्रत्यक्षाणि तिः न चा॥
हृष्टूपस्यासत्तो हृष्टूपप्रभोत्पादनेन न संभवत्यन्यथा चक्षुरूपादिसंततेनोकृत्ता
चिहृष्टूपत्वप्रसंगादिति तत्रात्रोक्तं व्याभिचारेनेति वाच्यं अहृष्टूपस्यापि हृष्टूपा
पादानत्वस्वीकारात् न हि युक्तिबलादर्थसिद्धौ कस्यचिन्नं थकर्तुरत्तादि॥
भ्रमतां विरोधं परिहरन्तीत्यलमप्रकृतविचारेण ननु आत्मेनाड्गाचाव्या॥
स्यतिव्याप्तीवारयितुमसन्नूनरूपानाश्रयत्वस्य पूर्णानाश्रयत्वे वादेय एवं च शब्देतरे
न्यद्दानप्रयुक्तं लाघवमिति चेन्न एवमप्यात्मन्यतिव्याप्तेर्दुर्वारत्वात् आत्मभि॥
न्नत्वमपि देयं एवं च सत्तुभयत्रापि तोल्यात् प्रत्यक्षेनाप्रादिति न्यायेन॥
तस्यैव सम्यक्त्वमिति यद्यप्युक्तरूपेतस्य पूर्णानाश्रयत्वत्तत्र भिन्नत्वयोर्निवेशो॥
भेदप्रतियोगिनां ।कि केषांचिदाश्रयित्ताहंवंधेन समवायेन वावच्छिन्नभेदप्रति

संयोगस्यैवतत्रदोषत्वांगीकारेणानियमस्याव्यभिचरितत्वात् नचेदमप्रसिद्धं।
सर्वोपिभ्रमोधर्मिण्यंशतः प्रकारेतुविपर्ययइतिनियमात् इतिवाच्यम् इहघ।
ल्यकेरंभोविहरतिचैत्रइतिसर्वानुभवसिद्धस्यमानसभ्रमस्यापलापयितु
मशक्यत्वात् नियमघटकभ्रमपदस्यमानसभिन्नपरत्वानेनेतरपरतापाश्रा
वश्यकत्वात् एतेनात्मभिन्नविशेषणतानैवात्मन्यतिव्याप्तिवारणेसत्यतस्य
निरर्थकत्वेतिपरास्तं पक्षतेतुनोऽप्याः शेक्षेतरताहशगुणाश्रयभिन्नत्वाभा
वाद्धारणासंभवात् अपेक्षितमपिसंतमसेनयेनान्तरस्यागुणत्वापसंस्पर्शेनेन
८८ यस्यचाक्षुषसंभवात् तत्त्वग्रहस्योद्भूतरूपंविनानसंभवतीतितदंगीका
रस्यावश्यकत्वाच्छब्देतरोद्भूतविशेषगुणाश्रयत्वेनताहशाश्रय।
भिन्नत्वाभावात् इदं च लक्षणं चाक्षुषाव्याप्तमितिचेन्न नयनस्यांगुल्या
संयोजनेपरिदृश्यमानगोलकांगुलीसंयोगरूपव्यंजकसमवधानो।

द्रं० वा०
पा
४

पदमितिनव्यमते प्राचांमते तु द्रव्यावयवसंयोगस्यापि प्रत्यक्षजनकत्वात् द्र
व्यावयवेवारयितुं मनःपदं संयोगपदं च तृतीयान्तत्वादिप्रत्यक्षेकारणसंबंधा
श्रयज्ञानादौवारयितुं अथ समवायेन तत्संबंधवत्वविवक्षणीये काला
दावतिव्याप्तिवारयितुं तेनैवात्रापि वारणसंभवे संयोगपदं व्यर्थमेवेति चेत्सत्यं
मनसः समवायप्रत्यक्षे जननीये मनःसंयुक्तादिविशेषणतायाः कारणत्वात्
तद्विशेषणतायाः समवायरूपत्वेन तदाश्रये तिव्याप्तेर्वारकेतत्पासंयोग
पदं सार्थक्यमिति अत्राप्रामाण्यप्रत्यक्षोपमानतादिकाः संबंधप्रत्यक्षे पाव
दाश्रयप्रत्यक्षस्य हेतुत्वात् समवायस्याप्रत्यक्षत्वेन किं तत्रातिव्याप्तिरिति तन्न सम
नोक्तं विज्ञानं संयोगप्रत्यक्षत्वावच्छेत्तथानियमोपयोगी कारणं समवायप्रत्यक्षत्वसंभ
वात् अन्यथा रूपघटे समवेतमिति प्रत्यक्षस्य बाधापत्तेः यद्वा समवायः
प्रत्यक्ष एव न चोक्तनियमव्यभिचारः तादृशनियमस्य निर्युक्तिः

॥६॥

ष्मोद्वे नाड्यांचाव्याप्तिस्त्यामीवारयितुमुक्तं तद्रूपानाश्रयत्वं वादेयं। एवं च शब्देतरेत्या
दानशब्दत्वलाघवमिति चेन्नावमव्याप्त्यन्यातेर्व्याप्तेर्दुर्वारत्वात् आत्माभिन्नत्वमपि देयं
एवं च तद्गुणभवत्वापि तौल्यात् श्रोत्रवृत्तिनाशगादि इति न्यायेन तस्यैव सम्यक्त्वमिति ध्यु
ष्पुरुतं तस्य स्पर्शानाश्रयत्वात् आत्माभिन्नत्वयोर्निवेशो मे दृश्यति योगितानां केषांचित् द्रव्याश्रयतासंबं
न समवायेनवावच्छिन्नभेदप्रतियोगितावच्छेदकताया समवायावच्छिन्नासंबंधे ।
नावच्छेदकयोः स्पर्शत्वोद्भूतत्वयोर्निवेशः शब्देतरत्वोद्भूतविशेषगुणानां
श्रयत्वो निवेशोऽनुद्भूतस्पर्शाश्रयाणामन्येषां चाश्रयसंबंधे न समवायेनवावच्छि
न्नप्रतियोगितावच्छेदकताया समवायादिसंबंधेनावच्छेदकयोर्गुणत्वोद्भूत ।
त्वयोर्गुणेतरस्य विशेषत्वस्य चाधिकस्य निवेशः इत्यर्थः तस्य स्पर्शानाश्रयत्व ।
निवेशे लाघवमिति न तेन तौल्यं तथापि यथासन्निवेशेन वैयर्थ्यमित्यभिधेयम्
कालादावतिव्याप्तिवारणाय विशेष्यतत्त्वैव तां वारयितुं ज्ञानकारणेति ।
तत्त्वैवरूपाभावसत्त्वेकारणाभूतत्वेऽतः स्पर्शानाश्रयतावारयितुमेनः ।

कु०वा०
९
गौ

मस्य घ्राणेन्द्रियावयवावधिकरणघटीयत्वाद्याप्यकाचानवाप।
तिजन्यत्वापत्तिविषयत्वाभावेन तत्तद्घटितत्वेपर्यानुपलब्धेरु।
भावात्मकत्वेरवमात्रप्रतियोगिकत्वेप्रतियोगधर्ममात्रावच्छि
न्नप्रतियोगिताकत्वेप्येवंतत्तद्भावप्रत्यक्षेप्रयोजकत्वेयत्रविशे
षणमात्रेणाद्रव्यसामान्याभावप्रत्यक्षेवारणमगुरुत्वावच्छे।
टात्यन्ताभावप्रत्यक्षेवारकत्वेनविपोच्छलेनमपेवते तत्रमा।
नैवद्रव्येघटोपरूपगुरुत्वान्यतरावच्छिन्नप्रतियोगिताकघटाभा
वप्रत्यक्षेवारकत्वेनयघघरूपत्वेप्रभूताननुभूतरूपावच्छिन्नप्र।
तियोगितावच्छेदकघटात्यन्ताभावप्रत्यक्षेवारकत्वेनैव
मात्रिकासंभवेऽप्यन्यतरावच्छिन्नावच्छेदककाभाव।
७ ॥ ७० ७०

९

कत्वेनाश्रयत्वात्तन्न चातींद्रियसंयोगप्रत्यक्षत्वापत्तिः संबंधप्रत्यक्षस्या
नुयोगिप्रतियोग्युभयाविषयकस्याप्रसिद्धत्वात्तेनैव वारणादिति
यत्तु घ्राणावयवेषु मनसो घटोपरूपाभावप्रत्यक्षे जननीये कार
णीभूतमनःसंयुक्तविशेषणतां घटितसंयोगाश्रयघ्राणावयवेति
व्याप्तिवारणाय ज्ञानलक्षणोऽवयवान्यत्वं देयमिति तन्न तद्दोषधिकर
णाकतद्विंद्रियजन्यसंयोगवत्तदभाववलौकिकप्रत्यक्षत्वावच्छिन्न
प्रतितद्दोषधिकरणकतद्वायादृकापत्तियोग्यातींद्रियजन्यानाहा
र्यतत्संसर्गकत्वेस्वकारकोपलंभस्य विषयतासम्बन्धावच्छि
न्नप्रतियोगिताकाभावरूपयोग्यानुपलब्धिहेतुत्वात्तदुक्तौ च
मनोजन्यानाहार्यसमवायसंसर्गकघटोपरूपप्रकारकोपल

॥ ५ ॥ ४ ४ ४ ४